कर्नाटकप्रशासनम्

# संस्कृतनन्दिनी-१

## अष्टमी कक्ष्या

## प्रथमभाषा संस्कृतम्

**(Revised)**

@KTBS
NOT TO BE REPUBLISHED

# 8

## द्वितीया-भागः

# SAMSKRITHA NANDINI-1

**EIGHTH STANDARD**

**FIRST LANGUAGE - SANSKRIT**

**PART-2**

**KARNATAKA TEXTBOOK SOCIETY (R)**

**6th Cross, Malleshwaram, Bengaluru-560 003.**

# पाठानुक्रमणिका

C9E9P6


| क्र.सं. | पाठाः | | पृष्ठसंख्या |
|---|---|---|---|
| | गणेशं भजेम | | |
| १. | प्रथमः पाठः | गुर्वष्टकम् (कण्ठपाठः करणीयः) | १ - ६ |
| २. | द्वितीयः पाठः | सन्धिः | ७ - १४ |
| ३. | तृतीयः पाठः | दुराशाफलम् | १५ - २० |
| ४. | चतुर्थः पाठः | सिद्धभूमिः सिद्धगङ्गा | २१ - २७ |
| ५. | पञ्चमः पाठः | पत्रलेखनम् | २८ - ३२ |
| ६. | षष्ठः पाठः | अनुवादः | ३३ |
| ७. | सप्तमः पाठः | पण्डितभास्करः | ३४ - ३९ |
| ८. | अष्टमः पाठः | समासः | ४० - ४२ |
| ९. | नवमः पाठः | प्रबन्धः | ४३ - ४४ |
| १०. | दशमः पाठः | तपोवनाभिगमनम् | ४५ - ५३ |
| ११. | एकादशः पाठः | प्रहेलिकाः | ५४ - ६२ |
| १२. | द्वादशः पाठः | सुबन्ताः | ६३ - ७४ |
| १३. | त्रयोदशः पाठः | तिङन्ताः | ७५ - ८४ |

| | पूरकपाठौ : | |
|---|---|---|
| १. | एकलव्यस्य गुरुभक्तिः | ८५ - ८६ |
| २. | परमकारुणिकः महर्षिः | ८७ - ८८ |
| | परिशिष्टम् | |
| १. | वाक्यरचनाकौशलम् | ८९ - ९१ |
| २. | पदकोशः | ९२ - ९६ |
| ३. | प्रश्नपत्रिकास्वरूपम् | ९७ |
| ४. | आरोग्यभाग्यम् | ९९ |
| ५. | पाठयोजना | १०० |


NOT TO BE REPUBLISHED ©KTBS

## प्रथमः पाठः

# गुर्वष्टकम्





@KTBS NOT TO BE REPUBLISHED

शरीरं सुरूपं तथा वा कलत्रम्
यशश्चारु चित्रं धनं मेरुतुल्यम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।१।।

कलत्रं धनं पुत्रपौत्रादि सर्वम्
गृहं बान्धवाः सर्वमेतद्धि जातम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।२।।

षडङ्गादिवेदो मुखे शास्त्रविद्या
कवित्वादि गद्यं सुपद्यं करोति ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।३।।

विदेशेषु मान्यः स्वदेशेषु धन्यः
सदाचारवृत्तेषु मत्तो न चान्यः ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।४।।

क्षमामण्डले भूपभूपालवृन्दैः
सदा सेवितं यस्य पादारविन्दम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।५।।

यशो मे गतं दिक्षु दानप्रतापात्
जगद्वस्तु सर्वं करे यत्प्रसादात् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।६।।

© KTBS NOT TO BE REPUBLISHED

न भोगे न योगे न वा वाजिराजौ
न कान्तामुखे नैव वित्तेषु चित्तम् ।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।७।।

अरण्ये नवा स्वस्य गेहे न कार्ये
न देहे मनो वर्तते मे त्वनर्घ्ये।
मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ।।८।।

गुरोरष्टकं यः पठेत्पुण्यदेही
यतिर्भूपतिर्ब्रह्मचारी च गेही।
लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञम्
गुरोरुक्तवाक्ये मनो यस्य लग्नम् ।।९।।

NOT TO BE REPUBLISHED ©KTBS

## अन्वयार्थः

१. सुरूपम् = सुशोभनं रूपम्
शरीरम् = देहः, तथा = एवम्, कलत्रम् = पत्नी
चारुचित्रं यशः वा = अनुपमकीर्तिः (उत्कृष्टकीर्तिसम्माननादिकं च)
मेरुतुल्यं धनम् = मेरुपर्वतसदृशं धनम् (प्रभूतं धनम्), (इत्यादिकम् अस्ति चेदपि) मनः = मतिः (चित्तम्)
गुरोरङ्घ्रिपद्मे = सद्गुरुचरणकमले, न लग्नम् = आसक्तं न भवति चेत्
ततः किम् = अनन्तरं किम् ? (सर्वोऽपि व्यर्थः)

२. कलत्रम् = जाया, धनम् = ऐश्वर्यम्,
पुत्रपौत्रादिसर्वम् = सुतः, पुत्रस्य पुत्रः इत्यादि सर्वम्, गृहम् = सदनम्,
बान्धवाः = बन्धुमित्रादयः, एतद्धि सर्वम् = इत्यादिकं सर्वम्,
जातम् = प्राप्तम्।
(तथापि गुरुचरणे मानसं यदि अनासक्तं तर्हि ततः परं किम् अस्ति ?)

३. षडङ्गादिवेदः = साङ्गवेदभागः
च = तथा
शास्त्रविद्या = अन्यानि शास्त्राणि च मुखे = स्ववदने सन्ति।
कवित्वादिगद्यं सुपद्यम् = गद्य-पद्यात्मकम् उत्तमकाव्यरचनासामर्थ्यम्
करोति = रचयति, (अथापि .............)

४. विदेशेषु = देशान्तरेषु, मान्यः = प्रशंसार्हः
स्वदेशेषु = स्वीयदेशेषु, धन्यः = धन्यताभावः
सदाचारवृत्तेषु = उत्तमेषु आचारविषयेषु, मत्तो = ममापेक्षया
न चान्यः = अन्यः कोऽपि नास्ति। (इति यः चिन्तयति तस्य)
(तथापि ...........)

५. यस्य = पण्डितस्य, पादारविन्दम् = चरणकमलम्
क्षमामण्डले = विस्तृतभूप्रदेशे. भूपभूपालवृन्दैः = राजाधिराजप्रभृतिभिः
सदा = सर्वदा, सेवितम् = अर्चितम्। (अथापि .............)

६. दानप्रतापात् = दानधर्मादिप्रभावात्, मे = मम
यशः = कीर्तिः, दिक्षु गतम् = पूर्वादिदिग्व्याप्तम्
जगद्वस्तु सर्वम् = प्रपञ्चे विद्यमानं समस्तं वस्तु
यत्प्रसादात् = यस्य गुरोः प्रभावात्, करे = स्वहस्तगतम् (चेदपि......)

NOT TO BE REPUBLISHED @KTBS

७. चित्तम् = मनः, भोगे = लौकिकसुखे
न = नास्ति एवम्, योगे न = योगाभ्यासादिविषयेषु नास्ति,
वा = अथवा, वाजिराजौ न = श्रेष्ठतुरगादिपशुव्यवहारादिषु नास्ति
कान्तामुखे न = जायामुखान्वेषणे आसक्तिः नास्ति
वित्तेषु न = ऐश्वर्यादिषु नास्ति, (अथापि .............)

८. मे = मम, मनः = चित्तम्, अरण्ये न = वनादिविषयेषु नास्ति,
स्वस्य गेहे = स्वीयगृहे नास्ति, कार्ये न = कर्मसु नास्ति,
अनर्घ्ये देहे न = उत्तमशरीरे नास्ति, (एवम् एतेषु वस्तुषु उपेक्षाभावनां प्राप्यापि ......)

९. यः पुण्यदेही = पूर्वपुण्यप्रभावेण यः श्रद्धावान्,
यतिः = संन्यासाश्रमं परिगृहीतवान् भिक्षुः, भूपतिः = महाराजः
ब्रह्मचारी च = वटुः च, गेही = गृहस्थो वा
गुर्वष्टकम् = गुर्वष्टकस्तोत्रम्, पठेत् = गायेत् (मननं कुर्यात्)
यस्य मनः = यस्य चित्तम्, गुरोरुक्तवाक्ये = सद्गुरुसन्देशे यदि,
लग्नम् = संलग्नं भवति तर्हि सः, वाञ्छितार्थम् = मनोऽभीष्टकामान्,
ब्रह्मसंज्ञम् = परब्रह्मपदं च, लभेत् = प्राप्नोति।

NOT TO BE REPUBLISHED
© KTBS

**कविकाव्यविचारः**

रचयिता - जगद्गुरुः श्री शङ्कराचार्यः
कालः - क्रि. श. ७८८ - ८२०
देशः - केरलराज्यस्य कालटिः
कृतयः - प्रस्थानत्रयस्य भाष्यम्
(भगवद्गीता, उपनिषत्, ब्रह्मसूत्राणि)
विवेकचूडामणिः, सौन्दर्यलहरी,
शिवानन्दलहरी, भजगोविन्दस्तोत्रम् इत्यादयः।

## अभ्यासः

१. **समानार्थकपदानि लिखत।**

१. शरीरम् २. धनम् ३. मनः ४. पादः
५. कलत्रम् ६. यशः

२. **अन्यलिङ्गपदं लिखत।**

१. पुत्रः २. धन्यः ३. अन्यः ४. मान्यः

३. **लिङ्ग-विभक्ति-वचनानि लिखत।**

१. विद्या २. स्वदेशेषु ३. भूपालवृन्दैः ४. प्रतापात् ५. योगे

४. **संयोजयत।**

| | अ | आ |
|---|---|---|
| १. | मुखे | मेरुतुल्यम् |
| २. | शरीरम् | शास्त्रविद्या |
| ३. | स्वदेशेषु | सुरूपम् |
| ४. | करं | धन्यः |
| ५. | धनम् | जगद्वस्तु |

५. **पञ्चषैः वाक्यैः कन्नडभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा उत्तरं लिखत।**

१. गुरोः महिमानं वर्णयत।

NOT TO BE REPUBLISHED ©KTBS

## अवधेयांशः

**श्रुति - स्मृति - पुराणानाम् आलयं करुणालयम्**
**नमामि भगवत्पादं शङ्करं लोकशङ्करम् ।।**
**अष्टवर्षे चतुर्वेदी - द्वादशे सर्वशास्त्रवित् ।**
**षोडशे कृतवान् - भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।**

*****

K7M2D3

# द्वितीयः पाठः

## सन्धिः




©KTBS NOT TO BE REPUBLISHED

वर्णानाम् अत्यन्तं सामीप्यं संहिता। यत्र संहिता भवति, तत्र क्वचित् वर्ण -व्यत्ययः भवति। अयमेव सन्धिः। सन्धौ त्रयः प्रकाराः सन्ति।

| स्वरसन्धिः | व्यञ्जनसन्धिः | विसर्गसन्धिः |
|---|---|---|
| (अच्) | (हल्) | |

**स्वरसन्धिः** → (अच्सन्धिः)

यत्र द्वयो : स्वरयोः (अचोः) संहिता, तत्र सन्धिकार्यं भवति। तत्र क्वचित् एकस्य वर्णस्य आदेशो भवति क्वचिच्च द्वयोः वर्णयोः। अयं स्वरसन्धिः नानाविधो भवति। यथा -

एतेषु चतुर्ष्वपि सन्धिषु पूर्वस्य परस्य च स्थाने एकादेशः भवति।

१. सवर्णदीर्घसन्धिः २. गुणसन्धिः

३. वृद्धिसन्धिः ४. पूर्वरूपसन्धिः

एतयोः द्वयोः सन्ध्योः पूर्वस्य एकस्यैव वर्णस्य स्थाने आदेशो भवति।

५. यण्सन्धिः ६. यान्त-वान्तादेशसन्धिः

**१. सवर्णदीर्घसन्धिः-** अ-इ-उ-ऋ (ह्रस्व-दीर्घ) एतेषां वर्णानां सवर्णे परे द्वयोः वर्णयोः स्थाने एकः सवर्णदीर्घः आदिष्टः भवति। अयमेव 'सवर्णदीर्घसन्धिः।'

| पूर्वपदस्य अन्तिमवर्णः | + | उत्तरपदस्य पूर्वस्वरः | = | आदेशस्वरः |
|---|---|---|---|---|
| अ / आ | + | अ / आ | = | आ |
| इ / ई | + | इ / ई | = | ई |
| उ / ऊ | + | उ / ऊ | = | ऊ |
| ऋ / ॠ | + | ऋ / ॠ | = | ॠ |

@KTBS NOT TO BE REPUBLISHED

**उदाहरणानि**

१. अ + आ = आ देव + आलयः = देवालयः
अ + अ = आ गुण + अतीतः = गुणातीतः
आ + आ = आ विद्या + आलयः = विद्यालयः
आ + अ = आ विद्या + अर्थी = विद्यार्थी

२. इ + इ = ई गिरि + इन्द्रः = गिरीन्द्रः
इ + ई = ई रवि + ईशः = रवीशः
ई + इ = ई शची + इन्द्रः = शचीन्द्रः
ई + ई = ई गौरी + ईशः = गौरीशः

३. उ + उ = ऊ गुरु + उपदेश = गुरूपदेशः

उ + ऊ = ऊ साधु + ऊचुः = साधूचुः

ऊ + उ = ऊ वधू + उत्साहः = वधूत्साहः

ऊ + ऊ = ऊ वधू + ऊर्मिका = वधूर्मिका

४. ऋ + ऋ = ॠ पितृ + ऋणम् = पितॄणम्

मातृ + ऋणम् = मातॄणम्

## २. गुणसन्धिः

अ - आ वर्णयोः, इ - ई परे एकारः ; अ - आ वर्णयोः, उ - ऊ परे ओकारः ; अ - आ वर्णयोः, ऋ - ॠ परे अर् आदेशः च भवति। अयं गुणसन्धिः।

| पूर्वपदस्य अन्तिमवर्णः | + | उत्तरपदस्य पूर्वस्वरः | = | आदेशस्वरः |
|---|---|---|---|---|
| | | इ / ई | = | ए |
| अ/आ | + | उ / ऊ | = | ओ |
| | | ऋ / ॠ | = | अर् |

@KTBS NOT TO BE REPUBLISHED

### उदाहरणानि

१. अ + इ = ए उप + इन्द्रः = उपेन्द्रः

अ + ई = ए सुर + ईशः = सुरेशः

आ +इ = ए महा + इन्द्रः = महेन्द्रः

आ + ई = ए उमा + ईशः = उमेशः

२. अ + उ = ओ सूर्य + उदयः = सूर्योदयः

अ + ऊ = ओ जल + ऊर्मिः = जलोर्मिः

आ +उ = ओ गङ्गा + उदकम् = गङ्गोदकम्

आ + ऊ = ओ महा + ऊर्मिः = महोर्मिः

३. अ + ऋ = अर् देव + ऋषिः = देवर्षिः

आ + ऋ = अर् महा + ऋषिः = महर्षिः

### ३. वृद्धिसन्धिः

अ - आ वर्णयोः, ए ऐ कारयोः परयोः ऐकारः ; अ - आ वर्णयोः ओ - औ परे औकारः च आदेशः भवति। अयं वृद्धिसन्धिः।

पूर्वपदस्य अन्तिमवर्णः + उत्तरपदस्य पूर्वस्वरः = आदेशस्वरः

| पूर्वपदस्य अन्तिमवर्णः | | उत्तरपदस्य पूर्वस्वरः | | आदेशस्वरः |
|---|---|---|---|---|
| अ/आ | + | ए / ऐ | = | ऐ |
| | | ओ / औ | = | औ |

**उदाहरणानि**

१. अ + ए = ऐ एक + एकम् = एकैकम्

अ + ऐ = ऐ अष्ट + ऐश्वर्यम् = अष्टैश्वर्यम्

आ + ए = ऐ सीता + एषा = सीतैषा

आ + ऐ = ऐ आत्मा + ऐक्यम् = आत्मैक्यम्

२. अ + ओ = औ वन + ओषधिः = वनौषधिः

अ + औ = औ दिव्य + औषधम् = दिव्यौषधम्

आ + ओ = औ गङ्गा + ओघः = गङ्गौघः

आ + औ = औ महा + औत्सुक्यम् = महौत्सुक्यम्

### ४. पूर्वरूपसन्धिः

पदान्ते विद्यमानयोः ए - ओ वर्णयोः परे अकारः भवति चेत्, पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशः भवति। अर्थात् ह्रस्वः अकारः लुप्यते। लेखनावसरे

NOT TO BE REPUBLISHED @KTBS

'अ' वर्णं सूचयितुम् 'ऽ' इति अवग्रहचिह्नम् उपयुज्यते। अयं 'पूर्वरूपसन्धिः'।

| पूर्वपदस्य अन्तिमस्वरः | + | उत्तरपदस्य पूर्वस्वरः | = | आदेशस्वरः |
|---|---|---|---|---|
| ए | + | अ | = | ए (ऽ) |
| ओ | + | अ | = | ओ (ऽ) |

| | | | |
|---|---|---|---|
| ए + अ = ए (ऽ) | हरे + अव | = | हरेऽव |
| ओ + अ = ओ (ऽ) | रामो + अवदत् | = | रामोऽवदत् |

**५. यण्सन्धिः** य् - व् - र् - ल् वर्णानां 'यण्' इति नाम।

इ - ई, उ - ऊ, ऋ - ॠ, लृ वर्णानाम् असवर्णे स्वरे परे इ - ईकारस्य स्थाने 'य्' वर्णः, उ - ऊकारस्य स्थाने 'व्' वर्णः, ऋ - ॠकारस्य स्थाने 'र्'वर्णः, लृकारस्य स्थाने 'ल्' इति वर्णः आदिष्टः भवति। अयं 'यण्'सन्धिः।

| पूर्वपदस्य अन्तिमवर्णः | + | उत्तरपदस्य पूर्ववर्णः | = | आदेशवर्णः |
|---|---|---|---|---|
| इ / ई | + | असवर्णस्वरः | = | य् |
| उ / ऊ | + | असवर्णस्वरः | = | व् |
| ऋ / ॠ | + | असवर्णस्वरः | = | र् |
| लृ | + | असवर्णस्वरः | = | ल् |

उदाहरणानि →

१. इ + अ = य  अति + अल्पः = अत्यल्पः
ई + उ = य  वाणी + उत्तमः = वाण्युत्तमः
उ + अ = व  मनु + अन्तरम् = मन्वन्तरम्
ऊ + अ = व  वधू + अलङ्कारः = वध्वलङ्कारः
ऋ + अ = र  पितृ + अर्थम् = पित्रर्थम्

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. विभज्य सन्धिनाम लिखत।**

१. गणेशः　　२. गङ्गोदकम्　　३. शचीन्द्रः

४. वनौकसः　　५. प्रत्येकम्

**२. संयोज्य सन्धिनाम लिखत।**

१. गौरी + ईशः　　२. महा + उत्सवः

३. एक + एकम्　　४. अति + उत्तमः

५. रामो + अपि　　६. गुरु + आदिः

## अवधेयांशः

### ६. यान्त-वान्तादेशसन्धिः

ए-ओ-ऐ-औ इति एतेषां वर्णानां स्थाने स्वरे परे अय् - अव् - आय् - आव् इति एते आदेशाः क्रमशः भवन्ति। अयं यान्त-वान्तादेशसन्धिः।

पूर्वपदस्य अन्तिमवर्णः + उत्तरपदस्य पूर्वस्वरः = आदेशस्वरः

| | | | | |
|---|---|---|---|---|
| ए | + | स्वरः | = | अय् |
| ओ | | | = | अव् |
| ऐ | | | = | आय् |
| औ | | | = | आव् |

**उदाहरणानि**

ए + ए = अय्　　हरे + ए = हरये

ओ + ए = अव्　　विष्णो + ए = विष्णवे

ऐ + अ = आय्　　नै + अकः = नायकः

औ + अ = आव्　　पौ + अकः = पावकः

©KTBS NOT TO BE REPUBLISHED

# क्रियाकलापः

**विभज्य सन्धिनाम लिखत।**

१) वधूत्साहः ............ + ............ = ............

२) पूर्णायुः ............ + ............ = ............

३) महेशः ............ + ............ = ............

४) महोत्सवः ............ + ............ = ............

५) ब्रह्मर्षिः ............ + ............ = ............

६) तत्रैकः ............ + ............ = ............

७) अन्तेऽपि ............ + ............ = ............

८) सोऽयम् ............ + ............ = ............

९) अत्यादरः ............ + ............ = ............

१०) दास्यपराधः ............ + ............ = ............

११) तन्वीशः ............ + ............ = ............

१२) वध्वेकान्तः ............ + ............ = ............

१३) पित्राज्ञाः ............ + ............ = ............

@KTBS NOT TO BE REPUBLISHED

**संयोज्य सन्धिनाम लिखत।**

पूर्वपदम् + उत्तरपदम् = संयुक्त पदम् = सन्धिनाम

१. गौरी + ईशः = ............... = ...............

२. वधू + ऊर्मिका = ............... = ...............

३. गुरु + उक्तम् = ............... = ...............

४. महा + ऊर्मिः = ............... = ...............

५. जल + उत्पत्तिः = ............... = ...............

६. दधि + ओदनम् = ............... = ...............

७. अति + उत्तमः = ............... = ...............

८. वधू + अष्टकम् = ............... = ...............

९. पितृ + आश्चर्यम् = ............... = ...............

१०. सैन्यस्य + उपरि = ............... = ...............

११. तथा + अपि = ............... = ...............

१२. जातो + असि = ............... = ...............

१३. यदि + अपि = ............... = ...............

*****

@KTBS NOT TO BE REPUBLISHED

K9Q4R9

पञ्चमीविभक्तिः
क्तवतुप्रत्ययः च

# तृतीयः पाठः

# दुराशाफलम्



१. पूर्वं पाटलीपुत्रनगरे मणिभद्रनामकः वणिक् आसीत्। कालान्तरे **विधिवशात्** सः अतीव निर्धनः अभवत्। **दारिद्र्यकारणात्** अत्यन्तं खिन्नः सः 'प्राणत्यागं करोमि' इति निर्णयम् अकरोत्।

२. किन्तु तस्मिन् दिने सः कञ्चित् स्वप्नं **दृष्टवान्**। स्वप्ने कञ्चित् क्षपणकं सः अपश्यत्। सः क्षपणकः मणिभद्रम् **उक्तवान्** - ''भोः, मणिभद्र ! अहं भवतः पूर्वजैः सम्पादितः निधिः अस्मि। मम नाम पद्मनिधिः। अहं भवतः गृहम् आगन्तुम् इच्छामि। प्रातः क्षपणकरूपेण आगमिष्यामि। भवान् दण्डेन मम शिरसि ताडयतु। तदा अहं कनकमयः भूत्वा अक्षय्यः भविष्यामि''

इति। **स्वप्नात्** मणिभद्रः अतीव सन्तुष्टः अभवत्। अनन्तरं सः **शयनात् उत्थितवान्।**

३. स्वप्नोक्तरीत्या कश्चित् क्षपणकः प्रातः मणिभद्रस्य गृहम् **आगतवान्**। मणिभद्रः अपि दण्डेन तं क्षपणकं शिरसि अताडयत्। तदा क्षपणकः

कनकमयः भूत्वा भूमौ **पतितवान्**। मणिभद्रः सर्वं कनकं गृहस्य अन्तः **नीतवान्**।

४. अत्रान्तरे अपरः कश्चित् नापितः तत्र **आगतवान्**। प्रवृत्तं सर्वमपि **दृष्टवान्** च। एतत् ज्ञात्वा मणिभद्रः नापितं गृहस्य अन्तः आहूय - ''मित्र। अत्र इदानीं भवता यत् दृष्टं तत् अन्यत्र कुत्रापि न वदतु'' इत्युक्त्वा तस्मै उपायनरूपेण किञ्चित् धनं **दत्तवान्**।

५. नापितः स्वगृहं गत्वा **चिन्तितवान्**-'क्षपणकान् दण्डेन ताडयामि चेत् अहम् अपि कनकयुतः भविष्यामि' इति।

६. अनन्तरदिने प्रातःकाले सः नापितः क्षपणक-विहारम् अगच्छत्। तत्रत्यान् सर्वान् अपि क्षपणकान् उद्दिश्य-''भवन्तः अद्य मध्याह्ने भोजनार्थं मम गृहम् आगच्छन्तु'' इति प्रार्थनाम् अकरोत्। क्षपणकाः सन्तोषेण तस्य वचनम् अङ्गीकृत्य नापितस्य गृहं **गतवन्तः**। नापितः द्वारं पिधाय दण्डेन तेषां शिरसि अताडयत्। क्षपणकाः भयात् कोलाहलं **कृतवन्तः**। कोलाहलं श्रुत्वा राजभटाः तत्र **आगतवन्तः**। ते नापितं न्यायालयं **नीतवन्तः**।

७. न्यायालये न्यायाधीशः नापितं पृष्टवान् - ''किमर्थं भवान् क्षपणकान् **ताडितवान्**?'' इति। नापितः मणिभद्रस्य गृहे दृष्टं सर्वम् अपि उक्तवान्। न्यायाधीशः मणिभद्रम् आहूय तस्य मुखात् सर्वं वृत्तान्तं **ज्ञातवान्**। दुराशापीडितं तं नापितं शूलम् **आरोपितवान्** च।

© KTBS NOT TO BE REPUBLISHED

**कविः - विष्णुशर्मा**

**कालः - क्रि. पू. द्वितीयशतकम्**

**देशः - महिलारोप्यनगरम् । एषः अमरशक्तेः आस्थाने आसीत् ।**

**कृतिः - पञ्चतन्त्रम् । अत्र पञ्च तन्त्राणि सन्ति ।**

१. मित्रभेदः
२. मित्रसम्प्राप्तिः
३. काकोलूकीयम्
४. लब्धप्रणाशः
५. अपरीक्षितकारकम्

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. पाटलीपुत्रनगरे कः आसीत् ?
२. मणिभद्रः किमर्थं खिन्नः अभवत् ?
३. मणिभद्रः स्वप्ने कम् अपश्यत् ?
४. मणिभद्रः क्षपणकं किम् अकरोत् ?

NOT TO BE REPUBLISHED @KTBS

**२. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत ।**

१. .............. मणिभद्रः अतीव निर्धनः अभवत् ।
(विधिवशात्, विधिवशम्)

२. 'पद्मनिधिः' इति ............. नाम ।
(नापितस्य, निधेः)

३. नापितः ................ काले क्षपणकविहारम् अगच्छत् ।
(रात्रि, प्रातः)

३. **संयोज्य सन्धिनाम लिखत।**

१. कुत्र + अपि = २. तथा + एव = ३. स्वप्न + उक्तम् =

४. **समानार्थकपदानि लिखत।**

१. खिन्नः २. कनकम् ३. शिरः ४. गृहम्

५. **लकार-पुरुष-वचनानि लिखत।**

१. करोमि २. भविष्यामि ३. ताडयतु

६. **घटनानुक्रमेण लिखत।**

१. राजभटाः नापितं न्यायालयं नीतवन्तः ।
२. नापितः क्षपणकविहारम् अगच्छत्।
३. मणिभद्रः स्वप्नं दृष्टवान्।
४. नापितः क्षपणकानां शिरसि दण्डेन अताडयत्।
५. क्षपणकः मणिभद्रस्य गृहम् आगतवान्।
६. पाटलीपुत्रनगरे मणिभद्रनामकः वणिक् आसीत्।

©KTBS NOT TO BE REPUBLISHED

७. **यथानिर्देशमुत्तरं लिखत।**

१. अहं भवतः पूर्वजैः सम्पादितः निधिः अस्मि।
कः पाठः ? कः अवदत् ? कम् अवदत् ?

२. भवन्तः मध्याह्ने भोजनार्थम् आगच्छन्तु।
कः पाठः ? कः अवदत् ? कान् अवदत् ?

३. किमर्थं भवान् क्षपणकान् ताडितवान् ?
कः पाठः ? कः अवदत् ? कम् अवदत् ?

**८. विरुद्धार्थकं पदं लिखत।**

१. प्रातः  २. सन्तुष्टः  ३. अन्तः

**९. पञ्चषैः वाक्यैः कन्नडभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा उत्तरं लिखत।**

१. मणिभद्रः कथं सुवर्णं प्राप्तवान् ?

२. राजभटाः नापितं किमर्थं न्यायालयं नीतवन्तः ?

## अवधेयांशः

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च
न पराभवमाप्नोति शक्रादपि कदाचन ।।

## क्रियाकलापः

**१. उदाहरणानुगुणं वाक्यं रचयत।**

उदा - फलं वृक्षः पतति। ✗

फलं वृक्षात् पतति। ✓

| | | | |
|---|---|---|---|
| १. | सुधाखण्डः | हस्तः | पतति। |
| २. | जलम् | आकाशः | पतति। |
| ३. | अध्यापिका | पुस्तकालयः | आगच्छति। |
| ४. | मूषकः | बिलम् | निर्गच्छति। |
| ५. | नारदः | आकाशः | अवतरति। |
| ६. | जलं | कुम्भः | स्रवति। |

©KTBS NOT TO BE REPUBLISHED

१. ______________________________

२. ______________________________

३. ______________________________

४. ______________________________

५. ______________________________

६. ______________________________

२. **उदाहरणानुगुणं वाक्यं रचयत।**

उदा - हरिणः व्याघ्रात् बिभेति। ✓

हरिणः व्याघ्रस्य बिभेति। ✗

१. बालकः <u>सिंहः</u> बिभेति।

२. मार्जारः <u>शुनकः</u> बिभेति।

३. धनिकः <u>चोरः</u> विभेति।

४. चोरः <u>आरक्षकः</u> बिभेति।

५. शत्रुः <u>सैनिकः</u> बिभेति।

१. ______________________________

२. ______________________________

३. ______________________________

४. ______________________________

५. ______________________________

*****

@KTBS NOT TO BE REPUBLISHED

W1Z3B4

षष्ठीविभक्तिः

## चतुर्थः पाठः

# सिद्धभूमिः सिद्धगङ्गा



NOT TO BE REPUBLISHED

**पीठिका -**

**अस्माकं** देशे सर्वत्र पुण्यक्षेत्राणि, पवित्रतीर्थानि, विविधानि मन्दिराणि च शोभन्ते। कर्णाटकराज्ये तुमकूरुमण्डले श्री सिद्धगङ्गाक्षेत्रमिति प्रख्यातं पवित्रं क्षेत्रं वर्तते। इदं **धर्मसन्देशस्य** पुण्यधाम। अस्मिन् पवित्रे परिसरे सर्वदा अध्यात्मचिन्तनं ज्ञानप्रसारः, अन्नदानं, धार्मिकोत्सवादीनि विविधानि सत्कर्माणि च प्रचलन्ति। **अस्य श्रीक्षेत्रस्य** महत्त्वम् अत्र निरूपितम्।

१) प्रायः षट्शतवर्षेभ्यः प्राक् श्रीक्षेत्रं संस्थापितम्। परमतपस्वी श्री गोसलसिद्धेश्वरः पुरा अत्र तपः आचरितवान्। सः **अन्यस्य** तपस्विनः जलतृष्णां निवारयितुम् इच्छन् स्वहस्तेन शिलायाः स्पर्शं कृतवान्। तदा

झटिति ततः जलं बहिः आगतम्। तेन जलेन सः स्वामिवर्यः सन्तृप्तः। तदारभ्य तत् स्थानं सिद्धगङ्गा इत्येव प्रख्यातम्।

२) श्रीक्षेत्रेण प्राथमिकशिक्षणतः तन्त्रज्ञानशिक्षणपर्यन्तं सर्वेषु स्तरेषु विद्यालयाः संस्थापिताः। प्रौढशालाः, पदवीमहाविद्यालयाः, तान्त्रिकमहाविद्यालयाः, प्रशिक्षणमहाविद्यालयः, **अन्धानां** शाला, **विकलाङ्गानां** विद्यालयः दैहिक-शिक्षणमहाविद्यालयः च श्रीक्षेत्रेण आरब्धाः। **संस्कृतभाषायाः** प्रसारार्थं विंशतिः संस्कृतपाठशालाः स्थापिताः। शास्त्रशिक्षणार्थं महाविद्यालयः अपि प्रतिष्ठापितः। **संस्थायाः** सर्वासु प्रौढशालासु **संस्कृतभाषायाः** बोधनं प्रचलति। सिद्धगङ्गासम्बद्धाः १२५ विद्यासंस्थाः सन्ति अद्य।

३) **संस्कृतशिक्षणस्य** कृते योगदानम् -

क्रि.श. १९१७ तमे वर्षे श्री उद्दानशिवयोगिनः **संस्कृतपाठशालायाः** आरम्भम् अकुर्वन्। तया सह **छात्रावासस्य** आरम्भोऽपि कृतः। अद्य अष्टसहस्राधिकाः छात्राः अत्रैव उषित्वा अध्ययनं कुर्वन्ति। क्रि.श. १९३७ तमे वर्षे **संस्कृतमहाविद्यालयस्य** आरम्भः अभवत्। अत्र प्रथमाकक्ष्यातः विद्वत्कक्ष्यापर्यन्तं **सर्वस्तरीयसंस्कृतशिक्षणस्य** व्यवस्था प्रकल्पिता वर्तते। अत्र वेदपाठशाला अपि सुशोभते। प्रतिवर्षं संस्कृतोत्सवः महता वैभवेन आचर्यते। विदुषां सम्माननम् अपि क्रियते।

४) कर्मयोगिनः डा।। शिवकुमारस्वामिनः ०३-०३-१९३० तः आरभ्य

श्री **सिद्धगङ्गामठस्य** पीठाधीशाः भूत्वा विराजन्ते। **एतेषां** जीवितसाधनं शब्दैः वर्णयितुं न शक्यते। विशेषतः **एतेषां** त्रिविधदानं स्मरणीयम्। यथा अन्नदानम्, ज्ञानदानम्, धर्मदानम् च इति। अष्टसहस्राय छात्रेभ्यः प्रतिदिनं प्रसादः दीयते। अत्रत्याम् अन्नदानपद्धतिं सर्वे गण्याः बहुधा प्रशंसन्ति।

© KTBS NOT TO BE REPUBLISHED

श्री **बसवेश्वरस्य** क्रान्तियोगः, श्री **सिद्धरामस्य** कर्मयोगः, श्री **अल्लमप्रभोः** वैराग्यम् एतेषां सङ्गमः स्वामिनां जीवने दृश्यते। **राष्ट्रस्य** उन्नत्यै **एतेषां** योगदानं सर्वैः अनुकरणीयम्।

५) **स्वामिनां** दर्शनभाग्यं तु **सर्वेषाम्** अपि **भक्तानां** सर्वदा वर्तते। **एतेषां** स्मरणशक्तिः असाधारणी। सौजन्यमूर्तिः, लोकहितचिन्तकः, तत्त्वविवेकी, अध्यात्मनिष्ठः, सर्वधर्मसमभावी, चलनशीलः इति च एते प्रख्याताः। **परमपूज्यानां** डा।। श्री **शिवकुमारस्वामिनां** जीवनं **समाजस्य** आदर्शभूतं वर्तते।

एवं श्री सिद्धगङ्गाक्षेत्रं पवित्रक्षेत्रेषु अन्यतमं वर्तते। वयं सर्वे प्रत्यक्षतः श्रीक्षेत्रं गत्वा श्री श्रीगुरूणां दर्शनं कृत्वा धन्याः भवेम।

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. आम् / न इति लिखत।

| | |
|---|---|
| यथा - श्रीरामस्य पत्नी सीता। | आम् |
| १. प्रायः षट्शतवर्षेभ्यः प्राक् श्रीक्षेत्रमारब्धम्। | |
| २. स्वामिवर्यः स्वहस्तेन वृक्षस्य स्पर्शं कृतवान्। | |
| 3. डा।। शिवकुमारस्वामिनां जीवनं समाजस्य आदर्शभूतं वर्तते। | |
| ४. श्रीबसवेश्वरस्य कर्मयोगः अतीव प्रसिद्धः। | |

### २. रेखाङ्कितपदान् आश्रित्य प्रश्ननिर्माणं कुरुत।

१. <u>संस्कृतस्य</u> अध्ययनार्थं पाठशालाः स्थापिताः।

२. <u>क्रि.श. १९१७ तमे</u> वर्षे संस्कृतपाठशालायाः आरम्भः अभवत्।

३. <u>सिद्धगङ्गाक्षेत्रे</u> वेदपाठशाला अपि सुशोभते।

४. अन्नदानविषये डा ।। श्री शिवकुमारस्वामिनः प्रसिद्धाः सन्ति।

५. पाठशालासु संस्कृतशिक्षणं प्रचलति ।

**३. लिङ्ग-विभक्ति-वचनानि लिखत ।**

१. विद्यालयः २. जलम् ३. भाषायाः ४. छात्राः

**४. चतुर्थं पदं लिखत।**

१. श्री बसवेश्वरः - क्रान्तियोगः ; श्री अल्लमप्रभुः ..............।

२. पीठाधीशानां - मठः ; छात्राणाम् ..............।

३. मैसूरु - महानगरम् ; सिद्धगङ्गा .............।

४. पुरुषार्थाः - चत्वारः ; दानानि .............।

५. गुरुवन्दनम् - प्रतिवर्षम् ; अन्नदानम् .............।

**५. समानार्थकपदानि लिखत।**

१. छात्रः २. अन्नम् ३. शिवः

**६. विरुद्धार्थकपदानि लिखत।**

१. पवित्रम् २. भेदः ३. स्मरणम्

**७. संयोज्य लिखत।**

| | अ | आ |
|---|---|---|
| १. | विदुषाम् | प्रथमा |
| २. | शब्दैः | द्वितीया |
| ३. | कर्मयोगम् | सप्तमी |
| ४. | तपस्वी | षष्ठी |
| ५. | भक्तेषु | तृतीया |
| | | चतुर्थी |

NOT TO BE REPUBLISHED @KTBS

८. **पञ्चषैः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, आङ्ग्ल भाषया वा लिखत**

१. सिद्धगङ्गाक्षेत्रे गङ्गायाः उद्भवः।

२. संस्कृतशिक्षणे श्रीक्षेत्रस्य योगदानम्।

## अवधेयांशः

**क्षेत्रस्य विशेषता -**

* श्री सिद्धलिङ्गेश्वरस्वामिनः मन्दिरम्
* गङ्गामातुः दर्शनम् (स्वयमेव उद्भूता)
* गोशाला, महती कल्याणी।
* स्थिरवस्तुप्रदर्शनम्।
* दिने द्विवारं छात्राणां सामूहिकप्रार्थना

## क्रियाकलापः

१. **उचितैः पदैः रिक्तस्थानानि पूरयत।**

१. वाल्मीकिः (रामायणम्) ................ रचयिता।

२. कालिदासः (रघुवंशम्) ............... रचयिता।

३. व्यासः (महाभारतम्) ............... रचयिता।

४. बाणः (कादम्बरीग्रन्थः) ............... रचयिता।

५. विष्णुशर्मा (पञ्चतन्त्रम्) .............. रचयिता

६. नारायणपण्डितः (हितोपदेशः) .............. रचयिता।

@KTBS NOT TO BE REPUBLISHED

२. **संयोजयत।**

| | क | ख | उत्तराणि |
|---|---|---|---|
| १. | एतस्य | तेषाम् | ________ |
| २. | भक्तस्य | अस्माकम् | ________ |
| ३. | परमपूज्यस्य | एतेषाम् | ________ |
| ४. | तस्य | भक्तानाम् | ________ |
| ५. | मम | परमपूज्यानाम् | ________ |

३. **कस्य उपरि किम् अस्ति इति लिखत।**

यथा - रामायणस्य उपरि महाभारतम् अस्ति।

| | | |
|---|---|---|
| पञ्चतन्त्रम् | १. | ........... उपरि ........... अस्ति। |
| नीतिशतकम् | २. | ........... उपरि ........... अस्ति। |
| हितोपदेशः | ३. | ........... उपरि ........... अस्ति। |
| पुराणम् | ४. | ........... उपरि ........... अस्ति। |
| नीतिकथा | ५. | ........... उपरि ........... अस्ति। |
| भागवतम् | ६. | ........... उपरि ........... अस्ति। |
| रघुवंशम् | ७. | ........... उपरि ........... अस्ति। |
| भगवद्गीता | ८. | ........... उपरि ........... अस्ति। |
| महाभारतम् | ९. | ........... उपरि ........... अस्ति। |
| रामायणम् | १०. | ........... उपरि ........... अस्ति। |

(एवमपि वाक्यानि कर्तुं शक्यते - उदा - पञ्चतन्त्रस्य अधः नीतिशतकम् अस्ति।)

@KTBS NOT TO BE REPUBLISHED

**४. उदाहरणानुसारं रिक्तस्थानं पूरयत।**

यथा-(कावेरीनदी) कावेरीनद्याः तीरे श्रीरंगपत्तनं

१. (अयोध्या) ............. राजा दशरथः।

२. (दशरथः) ............. चत्वारः पुत्राः।

३. (प्रथमः) ............. नाम रामः।

४. (द्वितीयः) ............. नाम भरतः।

५. (सीता) ............. पतिः श्रीरामः।

६. (अहम्) ............. एतत् पुस्तकम्।

७. (धर्मराजः) ............. अनुजः भीमः।

८. (एकलव्यः) ............. गुरुःद्रोणाचार्यः।

९. (गणेशः) ............. एषा शाला।

१०. (रेखा) ............. अग्रजः सुरेशः।

*****

@KTBS NOT TO BE REPUBLISHED

पञ्चमः पाठः

X7W9R1

# पत्रलेखनम्

## विरामपत्रम्

सकाशात्,

गौरी / गणेशः

अष्टमकक्ष्या 'अ' विभागः

सर्वकारीयप्रौढशाला

हासनम्

सविधे,

मुख्योपाध्यायः

सर्वकारीयप्रौढशाला

हासनम्

मान्याः,

विषयः - दिनत्रयस्य विरामं सम्प्रार्थ्य,

अहं श्वः मातापितृभ्यां सह मैसूरुनगरं गमिष्यामि। तत्र मम बन्धुगृहे उत्सवः वर्तते। अतः श्वः आरभ्य दिनत्रयं विरामं यच्छन्तु इति सविनयं प्रार्थये।

स्थलम् - हासनम् इति विधेया छात्रा / विधेयः छात्रः

दिनाङ्कः - १४-०८-२०१९ गौरी / गणेशः

@KTBS NOT TO BE REPUBLISHED

## पुस्तकप्रेषणविषये पत्रम्

सकाशात्,

महेशः / मालती

गृहसंख्या - १२/४, मुख्यमार्गः

शिवमोग्गा.

सविधे,

प्रबन्धकः

अक्षरप्रकाशनसंस्था

गिरिनगरम्

बेङ्गलूरु.

मान्याः,

विषयः - अपेक्षितानि पुस्तकानि सम्प्रार्थ्य,

अहम् अधोलिखितानि पुस्तकानि क्रेतुम् इच्छामि। कृपया एतानि पुस्तकानि प्रेषयन्तु।

१. सरलसंस्कृतव्याकरणम् ............. १

२. निबन्धप्रकाशः ............. १

३. संस्कृत-अभ्यासपुस्तिका ............. १

सधन्यवादम्,

स्थलम् - शिवमोग्गा

दिनाङ्कः - ०८-१२-२०१९

भवतः विश्वासपात्रम्,

महेशः/मालती

©KTBS NOT TO BE REPUBLISHED

# अवधेयांशः

- **पत्रलेखनावसरे एते अंशाः अवधेयाः।**

१) पत्रस्य आदौ एव पत्रलेखकस्य सङ्केतः भवेत्।

२) स्वीकर्तुः नामलेखनम् न अनिवार्यम्। परन्तु पदोल्लेखः अवश्यं करणीयः।

३) स्वीकर्तुः पदम् उल्लिख्य तस्य सम्बोधनं भवेत्।

यथा -

माननीय /माननीये

मान्यः / मान्ये

सम्पादकवर्य

४) यस्मिन् विषये पत्रं लिखामः सः विषयः एकवाक्येन भवेत्।

५) विषयस्य साक्षात् उपस्थापनं भवति। विवरणं च।

६) उपसंहारे सामान्यतः भवदीयः। भवदीया इत्यादयः भवन्ति।

७) अत्र लेखकस्य हस्ताङ्कनं भवति।

८) स्थलनिर्देशः पत्रप्रेषणस्य दिनाङ्कः च भवति।

NOT TO BE REPUBLISHED @KTBS

# क्रियाकलापः

## पत्रलेखनम्

पत्रेषु यथा व्यक्तिगतानि पत्राणि भवन्ति तथैव कानिचन कार्यालयसम्बद्धानि पत्राणि अपि भवन्ति। अत्र अभ्यासार्थं कार्यालयसम्बद्धानि पत्राणि दत्तानि।

पत्रस्वरूपम् एवं भवितुम् अर्हति।

सकाशात्

__________

__________

__________

१. लेखकस्य सङ्केतः

सविधे,

__________

__________

__________

२. स्वीकर्तुः सङ्केतः

३. सम्बोधनम्

४. विषयः - (विषयनाम)

५. प्रतिपाद्यः विषयः

६. उपसंहारः

७. हस्ताङ्कनम्

८. स्थलम्

दिनाङ्कः

@KTBS
NOT TO BE REPUBLISHED

● मञ्जूषायाः उचितं पदं स्वीकृत्य पत्रं पूरयत।

**सकाशात्,**

राम: / रमा

.............

शङ्करमार्ग:

.............

**सविधे,**

सम्पादक:

सम्भाषणसन्देश:

.................

गिरिनगरम्

बेङ्गलूरु - ८५

............

**विषय:** - ग्राहकत्वस्वीकरणाय

अहं सम्भाषणसन्देशस्य ......... ज्ञातवान्। ज्ञातवती। तत्र प्रकट्यमाना: लेखा: ......... भवन्ति। अत: ......... पत्रिकाया: ग्राहक: भवितुम् .........। तदर्थं ......... प्रेषयन्/ प्रेषयन्ती अस्मि। ......... अवसरं कल्पयतु।

भवदीय:/भवदीया

राम:/रमा

स्थलम् - हासनम्

दिनाङ्क: -

| |
|---|
| इच्छामि, धनम्, हासनम्, विषयम् |
| गृहसंख्या १/११, उत्तमा:, सम्पादकवर्य |
| मासपत्रिका, अहम्, कृपया |

@KTBS NOT TO BE REPUBLISHED

# षष्ठः पाठः

## अनुवादः

T4E6F1

1. ಹುಡುಗನು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾನೆ. ಅಲ್ಲಿ ಅವನು ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸುತ್ತಾನೆ. ಶ್ರದ್ಧೆಯಿಂದ ಪಾಠಗಳನ್ನು ಕೇಳುತ್ತಾನೆ. ಜೀವನದಲ್ಲಿ ಉತ್ತಮ ನಾಗರಿಕನಾಗುತ್ತಾನೆ.

२. जलपूर्णः मेघः आकाशे गर्जति। मेघस्य गर्जनं श्रुत्वा मयूराः नृत्यन्ति। जलधरः जलेन भूमिं सिञ्चति। कृषिकाः अपि सन्तुष्टाः भवन्ति।

3. ನಾನು ಎಂಟನೆಯ ತರಗತಿಯ ವಿದ್ಯಾರ್ಥಿಯಾಗಿದ್ದೇನೆ. ನಾನು ಪ್ರತಿದಿನ ಬೆಳಿಗ್ಗೆ 5.00 ಘಂಟೆಗೆ ಏಳುತ್ತೇನೆ. ಯೋಗಾಸನ ಮತ್ತು ದೇವರ ಪೂಜೆಯನ್ನು ಮಾಡುತ್ತೇನೆ. –ತಾಯಿತಂದೆಯರಿಗೆ ವಂದಿಸಿ ಶಾಲೆಗೆ ಹೋಗುತ್ತೇನೆ.

४. भारते बह्व्यः नद्यः प्रवहन्ति। अत्र बहूनि पुण्यक्षेत्राणि सन्ति। अतः भारतं पुण्यभूमिः इति प्रसिद्धम् अस्ति। वयं सर्वे भारतीयाः।

5. ಮಕ್ಕಳು ಕ್ರೀಡಾಂಗಣದಲ್ಲಿ ಆಟವಾಡುತ್ತಾರೆ. ಆಟದಿಂದ ಆರೋಗ್ಯವು ಹೆಚ್ಚುತ್ತದೆ. ಓದುವುದರಿಂದ ಬುದ್ಧಿ ವಿಕಾಸವಾಗುತ್ತದೆ. ಆದ್ದರಿಂದ ಜೀವನದಲ್ಲಿ ಓದುವುದು ಮತ್ತು ಆಟವಾಡುವುದು ಮುಖ್ಯವಾಗಿದೆ.

६. संस्कृते बहूनि काव्यानि सन्ति। तेषु 'रामायणम्' 'महाभारतम्' च प्रसिद्धे काव्ये। रामायणस्य कर्ता वाल्मीकिः। महाभारतस्य कर्ता वेदव्यासः।

7. ಭಾರತೀಯರ ಪವಿತ್ರ ಗ್ರಂಥ ಭಗವದ್ಗೀತೆ. ಭಗವದ್ಗೀತೆಯನ್ನು ಪಠಿಸುವುದರಿಂದ ನಮ್ಮ ಮನಸ್ಸಿಗೆ ಶಾಂತಿ ದೊರೆಯುತ್ತದೆ. ಆದ್ದರಿಂದ ನಾವು ಪ್ರತಿದಿನವೂ ಅದನ್ನು ಓದುತ್ತೇವೆ.

८. महाभारतं कौरवपाण्डवानां कथा। अत्र अवतारपुरुषस्य श्रीकृष्णस्य कथा, विदुरोपदेशः, भीष्मोपदेशः च प्रसिद्धाः अंशाः।

*****

©KTBS NOT TO BE REPUBLISHED

## सप्तमः पाठः

# पण्डितभास्करः

F6Z6K9



@KTBS NOT TO BE REPUBLISHED

पीठिका - भारतभूमिः बहूनां महापुरुषाणां जन्मभूमिः। अत्र जाताः बहवः अनेकेषु क्षेत्रेषु परिणताः सन्ति। तत्र संस्कृतक्षेत्रे अग्रगण्यः विद्वान् रङ्गनाथशर्मा।

१. कर्णाटकेषु शिवमोग्गामण्डलं मलेनाडुसीमायाः राजधानी इति प्रसिद्धम्। तत्र सोरबनामके उपमण्डले नडहल्ली इति कश्चन ग्रामः अस्ति। तस्मिन् ग्रामे श्री तिम्मप्पवर्यः नाम कश्चन कृषकः आसीत्। तस्य पत्नी श्रीमती जानकम्मा। तयोः दम्पत्योः चत्वारः पुत्राः, तिस्रः पुत्र्यः च। तेषु चतुर्थः पुत्रः श्री रङ्गनाथशर्मा। एषः महाभागः 'राक्षस'नामके संवत्सरे (०६-०४-१९१६) वैशाखशुक्ल- पञ्चम्यां 'पुनर्वसु'नक्षत्रे अजायत।

२. कृषिः, वेदान्तः, योगः, आयुर्वेदः इत्यादिषु परिणतः श्री वेङ्कप्पवर्यः एतस्य पितृव्यः। पितृव्येण प्रेरितस्य श्री रङ्गनाथवर्यस्य प्राथमिकः विद्याभ्यासः स्वग्रामे एवाभवत्। बाल्ये एव संस्कृताध्ययने विशेषरूपेणासक्तः एषः महाभागः 'अगडि'ग्रामस्थे आनन्दवने, 'केलदि'ग्रामस्थे श्री रामेश्वरक्षेत्रे च अध्ययनम् अकरोत्। महोदयस्य विद्यागुरुषु श्री केशवशास्त्री, श्री नारायणशास्त्री च प्रमुखौ।

३. रङ्गनाथवर्यः काव्यसाहित्याध्ययनानन्तरं बेङ्गलूरुनगरे श्री चामराजेन्द्रसंस्कृत-महाविद्यालये उन्नताध्ययनस्यारम्भम् अकरोत्। महता कष्टेन आत्मविश्वासेन च पठित्वा ''जीवन् भद्राणि पश्यति'' इति वचनस्य सार्थक्यम् अकरोत्। अलङ्कार-व्याकरण-वेदान्त शास्त्रेषु 'विद्वत्'- पदवीं सम्पाद्य स्वाध्यायेन कन्नडपण्डितपरीक्षाम् अपि समुत्तीर्णः अभवत्।

४. अध्ययनानन्तरं कानिचन वर्षाणि प्रौढशालायाम् अध्यापकः भूत्वा कार्यं निरवहत्। अष्टचत्वारिंशदधिकनवदशशत (१९४८) तमे वर्षे श्री चामराजेन्द्रसंस्कृत- महाविद्यालये एव व्याकरणशास्त्रस्य प्राध्यापकत्वेन नियुक्तोऽभवत्।

५. अध्ययनाध्यापने सदा निरतः एषः महोदयः संस्कृतभाषायां कन्नडभाषायां च षष्ट्यधिकान् ग्रन्थान् अरचयत्। श्री शङ्करचरितामृतम्, कुसुमाञ्जलिः, एकचक्रम् इत्यादयः संस्कृतग्रन्थाः। श्रीरामचन्द्रः, व्यासरहस्यम्, लौकिकन्यायः च कन्नडग्रन्थाः प्रमुखाः। अनुवादकृतिषु श्रीमद्वाल्मीकिरामायणम्, अमरकोशः, विदुरनीतिः च प्रसिद्धाः ग्रन्थाः। एतस्य महानुभावस्य देशभक्तिं, राष्ट्रहितचिन्तनं, प्रामाणिकतां च तदीयजीवनपद्धत्यां लेखनेषु च पश्यामः।

©KTBS NOT TO BE REPUBLISHED

६. ''काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्'' इति वचनस्य रङ्गनाथवर्यस्य जीवनमेव उदाहरणम्। एषः राज्योत्सव पुरस्कारः, राष्ट्रपतिपुरस्कारः महामहोपाध्यायः इत्यादिभिः प्रशस्तिभिः सम्मानितः। षट्सप्तत्यधिकनवदशशत (१९७६) तमे वर्षे निवृत्तः।

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत।**

१. रङ्गनाथवर्यस्य पितरौ कौ ?

२. रङ्गनाथवर्यः केषु शास्त्रेषु विद्वत् पदवीम् अलभत ?

३. रङ्गनाथवर्यस्य अनुवादकृतयः काः ?

४. रङ्गनाथवर्यः कुत्र अधीतवान् ?

**२. आम् / न इति लिखत।**

१. श्री रङ्गनाथवर्यः संस्कृताध्ययने आसक्तः। [ ]

२. दम्पत्योः द्वितीयः पुत्रः श्री रङ्गनाथवर्यः। [ ]

३. 'पुनर्वसुः' श्रीरङ्गनाथमहोदयस्य जन्मनक्षत्रम्। [ ]

४. बाल्ये श्री रङ्गनाथशर्मा ऐश्वर्येण युक्तः। [ ]

५. श्री रङ्गनाथमहोदयः विदेशे अधीतवान्। [ ]

**३. विभज्य सन्धिनाम लिखत।**

१. अत्रैकः २. कुसुमाञ्जलिः ३. पीडितोऽपि

NOT TO BE REPUBLISHED @KTBS

**४. संयोजयत।**

| | अ | आ |
|---|---|---|
| १. | शिवमोग्गा | वैशाखशुक्लपञ्चमी |
| २. | श्री रङ्गनाथशर्मा | पितृव्यः |
| ३. | वेङ्कप्पवर्यः | मलेनाडुसीमा |
| ४. | तिस्रः | पुत्राः |
| ५. | चत्वारः | पुत्र्यः |

**५. लिङ्ग-विभक्ति-वचनानि लिखत।**

१. वर्षाणि २. पितृव्येण ३. महोदयस्य ४. शास्त्रेषु

**६. अन्यलिङ्गपदानि लिखत।**

१. श्रीमती २. अध्यापकः ३. पत्नी ४. पितृव्यः

**७. विरुद्धार्थकपदानि लिखत।**

१. अनारोग्यम् २. उत्तीर्णः ३. पुण्यम् ४. प्रसिद्धः

NOT TO BE REPUBLISHED @KTBS

## अवधेयांशः

### कारकम्

**कर्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्॥**

**उदाहरणवाक्यानि**

प्रथमाविभक्तिः गोविन्दः पठति। (कर्ता)

द्वितीयाविभक्तिः रामः फलं खादति। (कर्म)

तृतीयाविभक्ति : गुरुः बालकं दण्डेन ताडयति। (करणम्)

चतुर्थीविभक्ति : माता भिक्षुकाय अन्नं यच्छति। (सम्प्रदानम्)

पञ्चमीविभक्ति : वृक्षात् फलं पतति। (अपादानम्)

सप्तमीविभक्ति : गिरीशः ग्रामे वसति। (अधिकारणम्)

**यत् क्रियया सह सम्बद्धं भवति, तत् कारकम्।**

| कारकाणि | | विभक्तिः | | उदाहरणम् |
|---|---|---|---|---|
| कर्तृ | → | प्रथमा | → | राजा |
| कर्म | → | द्वितीया | → | धनम् |
| करणम् | → | तृतीया | → | करेण |
| सम्प्रदानम् | → | चतुर्थी | → | दरिद्राय |
| अपादानम् | → | पञ्चमी | → | कोशात् |
| अधिकरणम् | → | सप्तमी | → | राजसभायाम् |
| | | | | यच्छति |

@KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

## रेखाङ्कितपदानां कारकनाम लिखत ।

१. सः बालकः अस्ति। सा अध्यापिका अस्ति।

२. माधवः शालां गच्छति। सीता मधुरं गायति।

३. सेवकः भारं वहति। वृषभः पादैः चलति।

४. सैनिकाः खड्गेन रक्षन्ति। अश्वाः ग्रासेन जीवन्ति।

५. तापसाः फलैः जीवन्ति। पिता पुत्रेण सह गच्छति।

६. अध्यापकः छात्राय ज्ञानं यच्छति।

७. धनिकः सेवकेभ्यः वस्त्राणि ददाति।

८. रमेशः ग्रामात् प्रातः आगच्छति।

९. महिलाः उद्यानेभ्यः फलानि आनयन्ति।

१०. वृक्षात् फलं पतति।

११. गजौ मार्गे चलतः। मानवाः गृहेषु वसन्ति।

१२. सिंहाः वने निवसन्ति। छात्राः विद्यालयेषु पठन्ति।

१. ______________ ______________

२. ______________ ______________

३. ______________ ______________

४. ______________ ______________

५. ______________ ______________

६. ______________ ______________

७. ______________ ______________

८. ______________ ______________

९. ______________ ______________

१०. ______________ ______________

११. ______________ ______________

१२. ______________ ______________

@KTBS NOT TO BE REPUBLISHED

*****

अष्टमः पाठः

# समासः

S3L1A5

अर्थम् अनुसृत्य पदद्वयस्य अथवा अनेकेषां पदानां संक्षेपेण कथनं समासः। समास इति पदस्य 'सङ्क्षेपः' इत्यर्थः। एवम् अर्थवशात् एकीभूतं पदं समस्तं पदम्। यथा - राज्ञः पुत्रः इति पदद्वयस्य समासे 'राजपुत्रः' इति समस्तं पदम्। समस्तस्य पदस्य विवरणं येन वाक्येन क्रियते तत् वाक्यं विग्रहवाक्यम्। यथा - कर्मकुशलः इति समस्तं पदम्। तस्य 'कर्मणि कुशलः' इति विग्रहवाक्यम्।

**समासे चत्वारः भेदाः सन्ति ।**

१. द्वन्द्वसमासः (रामकृष्णौ)

२. तत्पुरुषसमासः (चोरभयम्)

३. बहुव्रीहिसमासः (पीताम्बरः- विष्णुः)

४. अव्ययीभावसमासः (उपनगरम्)

@KTBS NOT TO BE REPUBLISHED

**१. द्वन्द्वसमासः - (सूत्रम्- चार्थे द्वन्द्वः)**

द्वन्द्वसमासे समासघटकानां सर्वेषां पदानां अर्थाः प्रधानाः भवन्ति । यदि पदद्वयं चेत् समस्तपदं द्विवचने भवति । अनेकानि पदानि सन्ति चेत् समस्तपदं बहुवचने भवति ।

द्वन्द्वसमासः द्विधा- १) इतरेतरद्वन्द्वः । २) समाहारद्वन्द्वः इति ।

१) इतरेतरद्वन्द्वसमासः - अत्र उत्तरपदस्य यल्लिङ्गं भवति तदेव समस्तपदस्य लिङ्गं भवति ।

यथाः- रामश्च लक्ष्मणश्च - रामलक्ष्मणौ ।

कुक्कुटश्च मयूरी च = कुक्कुटमयूर्यौ ।

हरिश्च हरश्च = हरिहरौ ।

धर्मश्च अर्थश्च कामश्च मोक्षश्च = धर्मार्थकाममोक्षाः ।

रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च = रामलक्ष्मणभरतशत्रुघ्नाः ।

आहारश्च निद्रा च भयं च = आहारनिद्राभयानि ।

पण्डितश्च वनिता च लता च = पण्डितवनितालताः ।

**२) समाहारद्वन्द्वसमासः**

अस्मिन् समासे समूहार्थः एव प्रधानः भवति । विग्रहवाक्ये तु 'समाहार' इति प्रयुज्यते । सामान्यतः अत्र समस्तपदं नित्यं नपुंसक लिङ्गे भवति।

उदाः- पाणी च पादौ च एतेषां समाहारः = पाणिपादम् ।

घटश्च पटश्च एतयोः समाहारः = घटपटम् ।

रथिकाश्च अश्वारोहाश्च एतेषां समाहारः = रथिकाश्वरोहम्

पुत्रश्च पौत्राश्च एतेषां समाहारः = पुत्रपौत्रम् ।

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. संस्कृतभाषया उत्तरं लिखत।**

१. समासो नाम कः ?

२. समासभेदान् लिखत।

३. समस्तं पदं नाम किम् ?

४. विग्रहवाक्यं नाम किम् ?

**२. समस्तपदं विलिख्य समासनाम लिखत।**

१. हरिः च हरः च

२. पञ्चानां तन्त्राणां समाहारः

३. पण्डितः च वनिता च लता च

४. कृष्णः च अर्जुनः च

**३. विग्रहवाक्यं विलिख्य समासनाम लिखत।**

१. ब्रम्हााच्युतशङ्कराः    २. भीमार्जुनौ

३. वसिष्ठविश्वामित्रौ    ४. रामलक्ष्मणौ

*****

NOT TO BE REPUBLISHED @KTBS

# नवमः पाठः ३, ४

## प्रबन्धः

प्रकृष्टो बन्धः प्रबन्धः इत्युच्यते । निबन्धः इति अस्य नामान्तरम् । नातिविस्तृतः नातिसङ्क्षिप्तरूपो प्रबन्धः लघुप्रबन्धः इति कथ्यते । प्रबन्धे सरलानि वाक्यानि अपेक्षितानि । मुख्यतया प्रबन्धाः वर्णनात्मकाः, विचारात्मकाः, आख्यानात्मकाः, व्याख्यानात्मकाः चेति चतुर्धा विभक्ताः । आभाणकादिभिः प्रबन्धाः आकर्षकाः भवन्ति । एतान् सर्वान् अंशान् मनसि निधाय छात्रैः प्रबन्धाः रचनीयाः ।

प्रबन्धे प्रस्तावना, विषयनिरूपणम्, उपसंहारश्चेति निरूपणक्रमः अपेक्षितः । प्रस्तावनायां प्रबन्धविषयस्य उपक्रमः, विषयनिरूपणभागे विषयस्य विस्तारः, उपसंहारभागे प्रबन्धविषयस्य सारांशः च भवेत् । प्रबन्धे वाक्यानां परस्परसम्बन्धः आवश्यकः । उदाहरणार्थम् अत्र केचन प्रबन्धाः प्रदत्ताः ।

### १. देशभक्तिः

बाल्ये एव देशभक्तिविषये आसक्तिः भवेत्। वयं 'मातृदेवो भव' इति उपनिषद्वाक्यं स्मरन्तः मातरं प्रणमामः। तद्वत् 'भारतमाता' अपि अस्माकं जननी अस्ति। अतः 'भारतमातुः' पूजा करणीया। अस्मासु देशभक्तिः सदा भवेत्। अस्माकं गृहस्य रक्षणं यथा प्रमुखं तथैव देशरक्षणम् अपि अस्माकं महत्त्वभूतं कार्यम्। प्रथमं देशहितचिन्तनं, ततः स्वहितचिन्तनम्। एवम् अस्माकं धारणा भवेत्।

### २. ग्रन्थालयः

ग्रन्थालयः छात्राणां ज्येष्ठानां सर्वेषामपि देवमन्दिरम् इव अस्ति। पुस्तकस्य पठनेन व्यक्तित्वविकासः भवति। ग्रन्थालये विज्ञानम्, भाषा, गणितम्, इतिहासः, कथाः, नाटकम् एवं सर्वविषयकाः ग्रन्थाः भवन्ति। दिनपत्रिकाः अपि भवन्ति। दिनपत्रिकापठनेन देश-विदेशस्य वार्ताः ज्ञायन्ते। ग्रन्थालयस्य उपयोगः छात्रैः करणीयः। नगरेषु ग्रामेषु सर्वत्रापि ग्रन्थालयः भवति।

NOT TO BE REPUBLISHED @KTBS

## ३. विद्यालयप्रवासः

अस्माकं विद्यालये प्रतिवर्षं विद्यालयप्रवासः भवत्येव। देशसञ्चारः करणीयः कोषः पठनीयः इत्युक्तिः प्रसिद्धा अस्ति। अतः प्रायः सर्वत्र शालासु शैक्षणिक-प्रवासः क्रियते।

अहं प्रवासं बहु इच्छमि। यतः तत्र मित्रैः सह क्रीडितुं शक्यते । यदि जलं भवति, तर्हि जले अपि क्रीडामि।

ऐतिहासिकं स्थलं, जलबन्धः, देवालयः, एवं विविधेषु प्रदेशेषु प्रवासः क्रियते। कदाचित् दिनत्रयस्य पञ्चदिनानाम् एकदिनस्य वा प्रवासः भवति। विद्यार्थिजीवने कृतस्य प्रवासस्य स्मरणं अग्रेऽपि अवश्यं भवति। अस्माकं कर्णाटकराज्ये बेलूरू, हळेबीडु, मैसूरु, उडुपि, कोल्लूरु, पम्पाक्षेत्रम्, चित्रदुर्गः - एवं प्रसिद्धप्रवास- स्थानानि सन्ति। मया सह मित्राणि मम गुरवः च आगच्छन्ति। गुरवः प्रवासस्य महत्त्वं कथयन्ति। ते इतिहासस्य वैशिष्ट्यं वर्णयन्ति।

## ४. रामायणम्

रामायणं श्रेष्ठम् आदिकाव्यम्। अस्य रचयिता श्रीवाल्मीकिमहर्षिः। रामायणे सप्त काण्डाः सन्ति। अस्मिन् काव्ये श्रीरामकथा वर्णिता अस्ति।

श्रीरामः आदर्शपुरुषः, पितृवाक्यपरिपालकः च आसीत्। सः वनं गत्वा चतुर्दश वर्षाणि उषितवान्। राक्षसानां हननं कृतवान्च। रावणः सीतायाः अपहरणं कृतवान्। आञ्जनेयः सीतायाः अन्वेषणं कर्तुं समुद्रस्य उल्लङ्घनं कृतवान्। श्रीरामरावणयोः मध्ये घोरयुद्धं जातम्। रामेण रावणः हतः। एवं दुष्टानां दण्डनं शिष्टानां रक्षणं च श्रीरामस्य जीवनलक्ष्यम् आसीत्।

श्रीरामः त्यागमयः आसीत्। प्राप्तस्य राज्यस्य त्यागं कृत्वा सः वनं गतवान्। प्रजासु सन्देहः न भवेत् इति पत्नीं सीतादेवीं वनं प्रति प्रेषितवान्। एवं श्रीरामस्य आदर्शगुणाः सर्वैः अनुकरणयोग्याः सन्ति।

*****

@KTBS NOT TO BE REPUBLISHED

## दाशमः पाठः

# तपोवनाभिगमनम्



© NOT TO BE REPUBLISHED

**पीठिका -**

काव्यं द्विविधम्। ''दृश्यकाव्यं श्रव्यकाव्यं च'' इति। नाटकं दृश्यकाव्यं भवति। ''काव्येषु नाटकं रम्यम्'' इति वाक्यं प्रसिद्धम्। अभिनययोग्यं सुन्दरं नाटकं संस्कृतभारत्या प्रकाशितात् ''कविकोपकलापः'' इति नाटकसङ्ग्रहात् स्वीकृतम् अस्ति।

(दशरथस्यास्थानम्। दशरथः वसिष्ठः च उपविष्टौ स्तः। सेवकः प्रविशति)

सेवकः - (प्रविश्य) जयतु महाराजः! प्रभो ! विश्वामित्रमहर्षिः आगतः अस्ति।

दशरथः - (उत्थाय) कः .....? विश्वामित्रमहर्षिः ? तं शीघ्रमेव अन्तः प्रवेशय।

सेवकः - यदाज्ञापयति महाराजः।

(गच्छति। विश्वामित्रेण सह प्रत्यागच्छति।)

दशरथः - महर्षे। अभिवादये ! (प्रणमति)

विश्वामित्रः - महाराज ! विजयी भव !

दशरथः - एतदासनम् अलङ्करोतु।

विश्वामित्रः - तथैव अस्तु। (उपविशति)

दशरथः - पूज्य ! सर्वं कुशलं किम्?

विश्वामित्रः - आम् ! महाराज ! सर्वं कुशलम्।

दशरथः - भवतः आगमनस्य कारणं ज्ञातुम् अर्हामि किम् ?

विश्वामित्रः - वदामि। परन्तु भवान् मया यत् अपेक्षितं 'तत् ददाति' चेत् ....।

दशरथः - महर्षे ! किमर्थं संशयः। भवान् यत् इच्छति तत् निश्चयेन ददामि।

विश्वामित्रः - राजन् ! वयं लोकहितार्थं यज्ञं कुर्वन्तः स्मः। परन्तु केचन राक्षसाः यज्ञे विघ्नम् उत्पादयन्तः सन्ति।

दशरथः - के ते राक्षसाः ?

विश्वामित्रः - ताटका नाम राक्षसी अस्ति। मारीचः सुबाहुः च तस्याः पुत्रौ। एते अस्मान् पीडयन्ति।

दशरथः - किं कुर्वन्ति ते ?

विश्वामित्रः - यज्ञसमाप्तिसमये यज्ञवेदिकायां रक्तमांसादिकं क्षिप्त्वा यज्ञं नाशयन्ति।

दशरथः - अहो दुरात्मानः।

विश्वामित्रः - तदर्थं राक्षससंहारं कृत्वा यागस्य रक्षणं कर्तुं भवतः पुत्रं रामं मया सह प्रेषयतु।

©KTBS NOT TO BE REPUBLISHED

दशरथः - किं वदति महर्षे ! राक्षसानां संहारार्थं रामः प्रेषणीयः ?

विश्वामित्रः - आम् ! रामं लक्ष्मणं च प्रेषयतु ।

दशरथः - महर्षे ! रामः इदानीं पञ्चदशवर्षीयः बालः । सः कथं वा राक्षसानां संहारं कुर्यात् ? लक्ष्मणः तु इतोऽपि बालः ।

विश्वामित्रः - राजन् ! रामः राक्षससंहारं कर्तुं समर्थः अस्ति । तमेव प्रेषयतु ।

दशरथः - मास्तु श्रीमन् ! बहुकालात् अनन्तरं मया पुत्राः प्राप्ताः । तान् पुत्रान् दूरं प्रेषयितुम् अहं कथं शक्नोमि ?

विश्वामित्रः - (सकोपम्) तर्हि मम यज्ञस्य रक्षणं कथम् ?

दशरथः - तद्विषये चिन्ता मास्तु । चतुरङ्गबलेन सह अहमेवागच्छामि । राक्षससंहारं करोमि ।

विश्वामित्रः - (विहस्य) ते राक्षसाः साधारणाः इति मा चिन्तयतु । तेषां वधं कर्तुं श्रीरामः एव समर्थः । तमेव प्रेषयतु ।

दशरथः - महर्षे ! क्षम्यताम् । एतावत्पर्यन्तं रामः कदापि राजभवनात् बहिः न गतवान् । सः घोरे अरण्ये कथं सञ्चारं करिष्यति ? मास्तु महर्षे! मास्तु .......

विश्वामित्रः - तर्हि भवान् रामं प्रेषयितुं न इच्छति ?

दशरथः - परन्तु अहमेव आगच्छामि किल....... ।

विश्वामित्रः - नापेक्षितम् । यदि शक्यं रामं लक्ष्मणं च प्रेषयतु । नो चेत् गमनाय अनुमतिं ददातु ।

दशरथः - (स्वगतम्) किं करोमि इदानीम् ....... ?

वसिष्ठः - दशरथ ! (सान्त्वनं करोति)

दशरथः - वसिष्ठमहर्षे ! भवान् सर्वं श्रुतवान् किल ! किं कुर्मः इदानीम् ?

NOT TO BE REPUBLISHED @KTBS

वसिष्ठः - महाराज ! एषः विश्वामित्रः सामान्यः न। स्वयं क्षत्रियकुले जातः अपि स्वप्रयत्नेन एव ब्रह्मर्षिपदं प्राप्तवान्। त्रिशङ्कु-महाराजं सदेहं स्वर्गं प्रति प्रेषितवान् एषः। एतस्य सामर्थ्यम् असाधारणम्। एतेन सह रामलक्ष्मणौ प्रेषयति चेत् तयोः महान् लाभः एव भविष्यति।

दशरथः - तर्हि....... भवतः अभिप्रायोऽपि तथैव वा ?

वसिष्ठः - आम्। यतः विश्वामित्रः शस्त्रशास्त्रयोः पारङ्गतः। तेन रामलक्ष्मणौ अपि तस्य उपदेशं प्राप्तुम् अर्हतः।

दशरथः - अस्तु। यदि भवतः आशयोऽपि एवमेव तर्हि अवश्यं प्रेषयामि। (विश्वमित्रं प्रति) महर्षे ! क्षणं तिष्ठतु। रामलक्ष्मणौ अत्रैव आह्वयामि। कः तत्र..... ?

सेवकः - आज्ञापयतु महाराजः।

दशरथः - इदानीमेव रामलक्ष्मणौ अत्र आनयतु।

सेवकः - यदाज्ञापयति महाराजः। (गच्छति। रामलक्ष्मणाभ्यां सह आगच्छति)

रामः लक्ष्मणः च - जनक ! अभिवादये।

दशरथः - आयुष्मान् भव ! आयुष्मान् भव।

रामः लक्ष्मणःच - (वसिष्ठम्) पूज्य ! अभिवादये।

वसिष्ठः - कीर्तिमान् भव। कीर्तिमान् भव।

दशरथः - तत्र पश्यतु। सः विश्वामित्रमहर्षिः। सः अस्माकं सर्वेषामपि पूज्यः।

रामः लक्ष्मणः च - महर्षे ! अभिवादये।

विश्वामित्रः - विजयी भव। विजयी भव।

© KTBS NOT TO BE REPUBLISHED

दशरथः - वत्स ! राम ! एषः विश्वामित्रः गाधिराजस्य पुत्रः। सः इदानीं भवतः साहाय्यम् इच्छति।

रामः - (आश्चर्येण) किं मम साहाय्यम् ? पितः ! विनोदार्थम् एवं वदति किं भवान् ?

विश्वामित्रः - नैव। भवतः पिता यत् वदति तत् सत्यमेव। वत्स। अहं लोककल्याणाय यज्ञमेकं कुर्वन् अस्मि। तत्र राक्षसाः विघ्नम् उत्पादयन्ति। ते राक्षसाः भवता मारणीयाः।

रामः - परन्तु....... तान् राक्षसान् मारयितुम् अहं समर्थः वा ?

विश्वामित्रः - किमर्थं न ? भवन्तं विना न कोऽपि समर्थः। अतः भवतोः साहाय्यम् अपेक्ष्यते।

लक्ष्मणः - महर्षे! ते राक्षसाः कुत्र सन्ति ?

विश्वामित्रः - ते अरण्ये सन्ति। तत्रैव भवन्तौ नयामि। (महाराजं प्रति) महाराज! किं वदति भवान् ?

दशरथः - महर्षे ! भवतः कुलगुरोः वसिष्ठस्य च वचनानुसारं रामलक्ष्मणौ भवता सह प्रेषयामि। वत्स, राम ! वत्स, लक्ष्मण ! अद्य आरभ्य महर्षिः विश्वामित्रः भवतोः गुरुः। तस्यादेशः पालनीयः।

रामः लक्ष्मणः च - पितः ! अवश्यं पालयावः।

दशरथः - (विश्वामित्रम् उद्दिश्य) महर्षे ! अद्यपर्यन्तं एतौ कुत्रापि न गतवन्तौ। कृपया तौ जागरूकतया नेतव्यौ।

विश्वामित्रः - राजन् ! चिन्ता मास्तु। मम पुत्रौ इव एतौ वर्धयामि।

दशरथः - रामलक्ष्मणौ बालौ। तयोः सम्भाषणे, आचरणे वा अपराधाः भवेयुः। कृपया तौ क्षन्तव्यौ।

NOT TO BE REPUBLISHED @KTBS

विश्वमित्रः - राजन् ! रामलक्ष्मणौ न साधारणौ, अपि तु अवतारपुरुषौ। अतः तयोः विषये चिन्ता एव मास्तु।

दशरथः - (रामलक्ष्मणौ आलिङ्ग्य) महर्षेः यज्ञसंरक्षणं कृत्वा शीघ्रमेव प्रत्यागम्यताम्।

विश्वामित्रः - महाराज ! तर्हि वयं साधयामः।

(सर्वे गच्छन्ति। दशरथः पश्यन् भवति)

**कविकाव्यविचारः**

**कविः - डा।। हेच्, आर्, विश्वासः**

**जन्मस्थानम् - कोप्प तालूक, चिक्कमङ्गलूरु मण्डलम्**

**जननम् - ३०-०३-१९५९.**

**कृतयः - अभ्यासपुस्तकम्, आधुनिक-नाटकानि, शिशुगीतानि, सम्भाषणसंस्कृतम् इत्यादयः।**

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. एकवाक्येन उत्तरं लिखत।**

१. ऋषयः किमर्थं यज्ञं कुर्वन्ति ?

२. राक्षसाः कथं यज्ञं नाशयन्ति ?

३. दशरथस्य कुलगुरुः कः ?

४. विश्वामित्रः कस्य पुत्रः ?

**२. रिक्तस्थानं पूरयत।**

१. केचन ................. यज्ञे विघ्नमुत्पादयन्ति।

२. .............. नाम राक्षसी अस्ति।

३. रामः ............... कर्तुं समर्थः अस्ति।

**३. यथा निर्देशमुत्तरं लिखत।**

१. विश्वामित्रमहर्षिः आगतः अस्ति।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

२. रामं लक्ष्मणं च प्रेषयतु।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**४. विभज्य सन्धिनाम लिखत।**

१. तथैव २. यथाज्ञापयति ३. नैव ४. वचनानुसारम्

**५. लिङ्ग-विभक्ति-वचनानि लिखत।**

१. वेदिकायाम् २. पुत्रान् ३. राजभवनात्

**६. वाक्यं रचयत।**

१. ज्ञातुम् २. कृत्वा ३. शीघ्रम्

**७. अन्यलिङ्गपदं लिखत।**

१. सेवकः २. आगतः ३. तस्याः ४. बालः

**८. पञ्चषैः वाक्यैः उत्तरं संस्कृतभाषया, कन्नडभाषया, अङ्ग्लभाषया वा लिखत।**

१. विश्वामित्रः रामलक्ष्मणौ किमर्थं वनम् अनयत् ? विवृणुत।

२. रामलक्ष्मणयोः वनप्रेषणावसरे दशरथस्य मनःस्थितिः कीदृशी आसीत् ? विशदयत।

## अवधेयांशः

**कविविशेषताः**

**प्रशस्तिः - बालसाहित्यप्रशस्तिः। सहित्य - अकाडेमि - अनुवाद प्रशस्तिः -२०१०**

**विशेष :- आधुनिकसंस्कृतसाहित्ये नूतनचिन्तनम्, संस्कृतसम्भाषणान्दोलने योगदानम्, दृश्य - श्रव्यमाध्यमे विशेषः परिश्रमः। 'संस्कृतभारती' संस्थायाः आरम्भात् पूर्णकालिकः कार्यकर्ता।**

NOT TO BE REPUBLISHED @KTBS

# क्रियाकलापः

**I. उदाहरणानुसारं वाक्यानि रचयत**

| | | | | |
|---|---|---|---|---|
| अध्यापकः | शिष्यः | - | उपदेशं | ददाति |
| | शिष्या | - | लेखनीं | |
| | पुत्रः | - | फलं | |
| | तनया | - | आभरणं | |
| | माता | - | वस्त्रं | |
| | दरिद्रः | - | धनं | |
| | मित्रं | - | पुस्तकं | |

उदा : अध्यापकः शिष्याय उपदेशं ददाति।

**II. यथानिर्देशं वाक्यानि रचयत।**

| | | | | | | |
|---|---|---|---|---|---|---|
| १. | माता | - | सुताः | - | हारं | यच्छति |
| २. | धनिकः | - | दरिद्राः | - | वस्त्राणि | |
| ३. | वैद्यः | - | रुग्णाः | - | औषधं | |
| ४. | अर्चकः | - | भक्ताः | - | पुष्पाणि | |
| ५. | जनकः | - | अभ्यागताः | - | पाद्यं | |
| ६. | अध्यापिका | - | छात्राः | - | मधुरं | |
| ७. | पाचकः | - | बालिकाः | - | रोटिकां | |

यथाः - (१) माता सुताभ्यः हारं यच्छति।

एते वृत्ताकारेण उपविशन्ति। इदानी कः /का, कस्मै/ कस्यै कन्दुकं ददातीति उदाहरणानुगुणं लिखत।

@KTBS NOT TO BE REPUBLISHED




उदा - १) रमेशः मालायै कन्दुकं ददाति ।

**III. उदाहरणानुगुणं पदम् अन्विष्य लिखत ।**

| | | | | |
|---|---|---|---|---|
| | रा | धि | का | यै |
| र | मा | यै | र्या | |
| क्षा | य | मा | य | व |
| यै | ज्ञा | ध | ज | नि |
| ना | य | वा | मा | ता |
| च | न | य | ना | यै |
| र | मे | शा | य | |

१. कार्याय  २. वनितायै  ३. यजमानाय  ४. नयनायै

५. रक्षायै  ६. रचनायै  ७. यज्ञाय  ८. रमायै

९. राधिकायै  १०. रामाय

*****

©KTBC NOT TO BE REPUBLISHED

एकादशः पाठः

# प्रहेलिकाः

M5B3X5

१. शैलजा पार्वती नास्मि वैष्णवी न हरिप्रिया।
माताहं जीवनं दात्री कास्मि सा वरवर्णिनी।।

२. चतुष्पदा न गौरस्मि गृहस्था नास्मि गेहिनी।
भूपपण्डितसभ्यानां काहं कान्तेति प्रोच्यताम्।।

३. वृक्षस्याग्रे फलं दृष्टं फलाग्रे वृक्ष एव च।
अकारादि सकारान्तं यो जानाति स पण्डितः।।

४. कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी।
पञ्चभर्त्री न पाञ्चाली यो जानाति स पण्डितः।।

५. अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः।।

६. न तस्यादिर्नतस्यान्तो मध्ये यस्तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद।।

**परिहारः**

१. गङ्गामाता २. आसन्दिका ३. अनानसः ४. लेखनी
५. पत्रम् ६. नयनम्

@KTBS NOT TO BE REPUBLISHED

## तात्पर्यम्

१. अहं शैलजा (पर्वतराजस्य पुत्री) अस्मि, किन्तु शिवस्य पत्नी पार्वती न। वैष्णवी अस्मि, किन्तु हरेः पत्नी लक्ष्मीः न। सर्वेभ्यः जलं ददामि, तर्हि वरदात्री 'अहं का' इति कथ्यताम् ।

२. मम चत्वारः पादाः सन्ति, किन्तु नाहं धेनुः। सदा गृहे एव निवसामि, किन्तु नाहं गृहिणी। भूपतिः पण्डितः, गण्याः इत्यादीनां सर्वेषां प्रिया अस्मि, तर्हि 'अहं का' इति उच्यताम् ।

३. अहं कश्चित् वृक्षः अस्मि, ममाग्रे फलं वर्तते, पुनः फलस्य अग्रे वृक्षः एव अस्ति। मम आदौ अकारः श्रूयते, अन्ते सकारश्च श्रूयते। तर्हि कोऽहम् इति यः वदति सः पण्डितः।

४. मम मुखं कृष्णवर्णयुक्तमस्ति, किन्तु नाहं मार्जारी। मम जिह्वाद्वयम् अस्ति, किन्तु नाहं सर्पिणी। पञ्चभर्त्री अस्मि, किन्तु नाहं द्रौपदी। तर्हि अहं का इति यः वदेत् सः पण्डितः भवति।

५. मम पादौ न स्तः, किन्तु बहुदूरं गन्तुं शक्नोमि। नाहं विद्याभ्यासं कृतवान्, किन्तु अक्षराणि पठितुं शक्नोमि। मम मुखमेव नास्ति, परन्तु स्पष्टं कथयामि। तर्हि कोऽहम् इति यः वदेत् सः अवश्यं पण्डितः भवति।

६. आरम्भे (आदौ) 'न' इति श्रूयते, मध्ये 'य' इति श्रूयते। पुनः अन्ते 'न' इति श्रूयते। भवतः अपि तदस्ति, ममापि तदस्ति, तर्हि तत् किं स्यात् ? इति कथ्यताम्।

©KTBS NOT TO BE REPUBLISHED

# अभ्यासः

## १. एकवाक्येन उत्तरं लिखत।

१. सा वरवर्णिनी का ?

२. आसन्दिका केषां कान्ता अस्ति ?

३. वृक्षस्य अग्रे किं दृष्टम् ?

४. पञ्चभर्त्री किन्तु पाञ्चाली न, सा का ?

## २. विभज्य सन्धिनाम लिखत।

१. कास्मि २. प्रोच्यताम् ३. वृक्षस्याग्रे ४. अप्यस्ति

## ३. एतेषां क्रियापदानां बहुवचनरूपं लिखत।

१. अस्मि .............।

२. जानाति .............।

३. गच्छति ............।

४. अस्ति ............।

## ४. रिक्तस्थानानि पूरयत।

१. माताहं .............. दात्री।

२. वृक्षस्याग्रे ............... दृष्टम्।

३. ............... न च सर्पिणी।

४. अमुखः ............... वक्ता।

@KTBS NOT TO BE REPUBLISHED

## ५. एकवचनरूपं लिखत।

उदा - काः - का

१. वयम् → ............।

२. युष्माकम् → ............।

३. जीवनानि → ............।

४. ये → ............ ।

## ६. वाक्यं रचयत।

१. माता  २. जानाति  ३. मम

## ७. संयोजयत।

| | अ | आ |
|---|---|---|
| १. | वरवर्णिनी | पत्रम् |
| २. | कृष्णमुखी न मार्जारी | गङ्गामाता |
| ३. | साक्षरः न पण्डितः | लेखनी |

## ८. चतुर्थं पदं लिखत।

१. पार्वती - ईकारान्तः। हरिप्रिया - ..............।

२. नास्मि - सवर्णदीर्घः। कान्तेति - ..............।

३. जिह्वा - रसना। वृक्षः ..............।

४. तिष्ठति - प्रथमपुरुषः। जानासि - ..............।

@KTBS NOT TO BE REPUBLISHED

९. **समानार्थकपदानि लिखत।**

१. माता २. पण्डितः

३. मार्जारः ४. समुद्रः

## अवधेयांशः

१. तातेन कथितं पुत्र ! पत्रं लिख ममाज्ञया।
न तेन लिखितो लेखः पितुराज्ञा न लोपिता।।

२. कुलालस्य गृहेऽप्यर्धं तदर्धं हस्तिनापुरे।
लङ्कायामपि तद्युग्मं यो जानाति स पण्डितः।।

३. का पाण्डुपत्नी गृहभूषणं किम्।
को रामशत्रुः किमगस्त्यजन्म।
कः सूर्यपुत्रो विपरीतपृच्छा
कुन्ती सुतो रावणकुम्भकर्णाः।।

उत्तरं- १. नतेन = विनयेन
२. कुम्भकर्णः
३. कुन्ती, सुतः, रावणः, कुम्भः, कर्णः

## क्रियाकलापः

I. **कोष्टकात् समुचितं पदं स्वीकृत्य रिक्तस्थानं पूरयत ।**

(हस्ताभ्याम्, पादाभ्याम्, नेत्राभ्याम्, सुधाखण्डेन, स्यूतेन)

१. गुरु :____________________ ताडयति ।

© KTBS NOT TO BE REPUBLISHED

२. छात्र :______________________गच्छति ।

३. सेवक :______________________वस्तूनि आनयति ।

४. भक्तः______________________देवं पूजयति ।

५. बालकः______________________चित्रं पश्यती ।

६. बालिका______________________लिखति ।

**II. रिक्तस्थानं पूरयत ।**

१. छात्रः______________________सह शालां गच्छति । (मित्रेण/ मित्रस्य)

२. ___________________विना जीवनं न सिध्यति । (धनस्य/धनेन)

३. ________________ विना जीवनं कष्टम् । (विद्यया/विद्यायाः)

४. ______________अरोग्यरक्षणं भवति । (योगाभ्यासेन/योगाभ्यासे)

**III. चतुर्थपदं लिखत ।**

१. नदी-नद्या; मुनिः-______________________।

२. माता-मात्रा; रूपम् ______________________।

३. गुरुः-गुरुणा ; देवः-______________________।

४. सः - तेन ; सा-______________________।

५. त्वं - त्वया ; अहम्-______________________।

६. वनम् - वनेन; माला-______________________।

**IV. अस्मिन् परिच्छेदे तृतीयाविभक्त्यन्तं पदं निर्दिशत।**

संस्कृतभारत्या 'सम्भाषणसन्देशः' नाम मासपत्रिका प्रकाश्यते। अस्याः मासपत्रिकायाः पठनेन संस्कृताभ्यासः भवति। पत्रिकायां रमणीयाः कथाः भवन्ति। नीतिकथया जीवनमौल्यं वर्धते।

@KTBS NOT TO BE REPUBLISHED

सम्भाषणसन्देशेन सर्वत्र संस्कृतप्रसारः जायमानः वर्तते। प्रथमं संस्कृतेन सम्भाषणम्। ततः सम्भाषणसन्देशस्य पठनम्। अनेन प्रकारेण वयं संस्कृताध्ययनं कुर्मः।

## V. इतरवचनरूपाणि लिखत।

१. कीटम् ....... .......।

२. भाषाम् ....... .......।

३. ....... शब्दौ .......।

४. विभागम् ....... .......।

५. ....... सेवे .......।

६. ....... ....... मालाः।

७. मन्दिरम् ....... .......।

८. ज्ञानम् ....... .......।

९. शालाम् ........ .......।

१०. भविष्यति ........ .......।

११. कण्ठे ........ .......।

१२. महाराजस्य ......... .......।

## VI. उचितेन पदेन रिक्तस्थानं पूरयत।

१. भक्तः ....... गच्छति। (मन्दिर)

२. पितृव्यः ....... पठति। (पत्रिका)

३. नारदः ....... वादयति। (वीणा)

४. माता ....... ज्वालयति। (दीप)

५. शिष्यः ....... सम्पादयति। (ज्ञान)

६. पिता ....... पालयति। (सुता)

७. वानरः ....... आरोहति। (वृक्ष)

८. मातामही ....... कथयति। (कथा)

९. पुत्रः ....... खादति। (फल)

१०. छात्रः ....... पृच्छति। (अध्यापक)

© KTBS NOT TO BE REPUBLISHED

**VII.उदाहरणानुगुणं वाक्यानि पूरयत।**

उदा - सज्जन, पूजक

अहं सज्जनं पूजकं च नमामि।

| | | | | |
|---|---|---|---|---|
| | वृक्ष | फल | | |
| | वार्ता | कथा | | |
| | अम्बा | अग्रजा | | |
| | राम | कृष्ण | | |
| | क्षेत्र | उद्यान | | |
| | जनक | जननी | | |
| | पत्र | चित्र | | |
| | पुस्तक | फल | | |
| | प्रश्न | उत्तर | | |

@KTBS NOT TO BE REPUBLISHED

**VIII. रिक्तस्थाने शुद्धं रूपं लिखत।**

१. वयं ................ गायामः। (श्लोकाः / श्लोकान्)

२. वयं ................ रचयामः। (चित्राणि / चित्रे)

३. ते ................ गच्छन्ति। (देवालय / देवालयम्)

४. ते ................ लिखन्ति। (श्लोकाः / श्लोकान्)

५. ताः ................ क्रीणन्ति। (पत्रिकाः / पत्रिकां)

६. ताः ................ आनयन्ति। (मालया / मालाः)

७. यूयं ................ पठथ। (ग्रन्थान् / ग्रन्थाः)

८. यूयं ................ गच्छथ। (उद्यानानि / उद्यानात्)

## IX. उत्तराणि चित्वा कोष्ठके लिखत।

भक्तः एनं नमति। →

बालकः एतत् पठति। →

पिता अत्र गच्छति। →

महिला एतत् पश्यति। →

सेवकः एतत् आनयति। →

क्रीडापटुः इदं करोति। →

छात्रः एतत् शृणोति। →

माता एतत् पचति। →



| | | | | | | | |
|---|---|---|---|---|---|---|---|
| दूरदर्शनं | वार्तापत्रिकां | वचनं | अन्नं | पुस्तकं | देवं | योगाभ्यासं | कार्यालयं |

@KTBS NOT TO BE REPUBLISHED

*****

# द्वादशः द्वादशः पाठः

## सुबन्ताः

D8M4J6

पदम् इत्युक्ते अर्थबोधकः वर्णसमूहः। यदि वर्णसमूहात्मकः शब्दः सुबन्तः तिङन्तो वा भवति तर्हि तस्य पदमिति व्यवहारः व्याकरणशास्त्रे भवति। अत्र केचन सुबन्तशब्दाः प्रदत्ताः।

'अ' कारन्तः पुंलिङ्गः 'राम' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| प्रथमाविभक्तिः | रामः | रामौ | रामाः | ರಾಮನು, Rama is |
| सम्बोधनाप्रथमाविभक्तिः | हे राम | हे रामौ | हे रामाः | ಎಲೈ ರಾಮ, O! Rama |
| द्वितीयाविभक्तिः | रामं | रामौ | रामान् | ರಾಮನನ್ನು, to Rama |
| तृतीयाविभक्तिः | रामेण | रामाभ्याम् | रामैः | ರಾಮನಿಂದ, by Rama<br>with Rama |
| चतुर्थीविभक्तिः | रामाय | रामाभ्याम् | रामेभ्यः | ರಾಮನಿಗಾಗಿ,<br>For Rama<br>to Rama |
| पञ्चमीविभक्तिः | रामात् | रामाभ्याम् | रामेभ्यः | ರಾಮನ ದೆಸೆಯಿಂದ<br>from Rama |
| षष्ठीविभक्तिः | रामस्य | रामयोः | रामाणाम् | ರಾಮನ, of Rama |
| सप्तमीविभक्तिः | रामे | रामयोः | रामेषु | ರಾಮನಲ್ಲಿ, in Rama (at, upon, among, there) |

एवं जनक, सुरेश, गोपाल, आनन्द इत्यादयः शब्दाः ज्ञेयाः।

@KTBS NOT TO BE REPUBLISHED

‘आ’ कारान्तः स्त्रीलिङ्गः ‘कला’ शब्दः

| | **ए.व.** | **द्वि.व.** | **ब.व** |
|---|---|---|---|
| **प्र.वि.** | कला | कले | कलाः |
| **सं.प्र.वि.** | हे कले | हे कले | हे कलाः |
| **द्वि. वि** | कलाम् | कले | कलाः |
| **तृ.वि.** | कलया | कलाभ्याम् | कलाभिः |
| **च.वि.** | कलायै | कलाभ्याम् | कलाभ्यः |
| **पं. वि** | कलायाः | कलाभ्याम् | कलाभ्यः |
| **ष.वि.** | कलायाः | कलयोः | कलानाम् |
| **स.वि.** | कलायाम् | कलयोः | कलासु |

एवं सीता, रमा, शाला, इत्यादयः शब्दाः ज्ञेयाः

‘अ’ कारान्तः नपुंसकलिङ्गः ‘वन’ शब्दः

| | **ए.व.** | **द्वि.व.** | **ब.व** |
|---|---|---|---|
| **प्र.वि.** | वनम् | वने | वनानि |
| **सं.प्र.वि.** | हे वन | हे वने | हे वनानि |
| **द्वि. वि** | वनम् | वने | वनानि |
| **तृ.वि.** | वनेन | वनाभ्याम् | वनैः |
| **च.वि.** | वनाय | वनाभ्याम् | वनेभ्यः |
| **पं. वि** | वनात् | वनाभ्याम् | वनेभ्यः |
| **ष.वि.** | वनस्य | वनयोः | वनानाम् |
| **स.वि.** | वने | वनयोः | वनेषु |

एवं फल, नयन, पुस्तक इत्यादयः शब्दाः ज्ञेयाः।

NOT TO BE REPUBLISHED
©KTBS

‘इ’ कारान्तः पुंलिङ्गः ‘हरि’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | हरिः | हरी | हरयः |
| **सं.प्र.वि.** | हे हरे | हे हरी | हे हरयः |
| **द्वि. वि** | हरिम् | हरी | हरीन् |
| **तृ.वि.** | हरिणा | हरिभ्याम् | हरिभिः |
| **च.वि.** | हरये | हरिभ्याम् | हरिभ्यः |
| **पं. वि** | हरेः | हरिभ्याम् | हरिभ्यः |
| **ष.वि.** | हरेः | हर्योः | हरीणाम् |
| **स.वि.** | हरौ | हर्योः | हरिषु |

एवं कवि, रवि, अग्नि, विधि इत्यादयः शब्दाः ज्ञेयाः।

NOT TO BE REPUBLISHED @KTBS

‘इ’ कारान्तः स्त्रीलिङ्गः ‘मति’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | मतिः | मती | मतयः |
| **सं.प्र.वि.** | हे मते | हे मती | हे मतयः |
| **द्वि. वि** | मतिम् | मती | मतीः |
| **तृ.वि.** | मत्या | मतिभ्याम् | मतिभिः |
| **च.वि.** | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| **पं. वि** | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| **ष.वि.** | मत्याः/मतेः | मत्योः | मतीनाम् |
| **स.वि.** | मत्याम्/मतौ | मत्योः | मतिषु |

‘उ’ कारान्तः पुंलिङ्गः ‘गुरु’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | गुरुः | गुरू | गुरवः |
| **सं.प्र.वि.** | हे गुरो | हे गुरू | हे गुरवः |
| **द्वि. वि** | गुरुं | गुरू | गुरून् |
| **तृ.वि.** | गुरुणा | गुरुभ्याम् | गुरुभिः |
| **च.वि.** | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| **पं. वि** | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| **ष.वि.** | गुरोः | गुर्वोः | गुरूणाम् |
| **स.वि.** | गुरौ | गुर्वोः | गुरुषु |

एवं शम्भु, भानु, वायु विष्णु इत्यादयः शब्दाः ज्ञेयाः ।

©KTBS NOT TO BE REPUBLISHED

‘उ’ कारान्तः स्त्रीलिङ्गः ‘धेनु’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | धेनुः | धेनू | धेनवः |
| **सं.प्र.वि.** | हे धेनो | हे धेनू | हे धेनवः |
| **द्वि. वि** | धेनुम् | धेनू | धेनूः |
| **तृ.वि.** | धेन्वा | धेनुभ्याम् | धेनुभिः |
| **च.वि.** | धेन्वै - धेनवे | धेनुभ्याम् | धेनुभ्यः |
| **पं. वि** | धेन्वाः-धेनोः | धेनुभ्याम् | धेनुभ्यः |
| **ष.वि.** | धेन्वाः-धेनोः | धेन्वोः | धेनूनाम् |
| **स.वि.** | धेन्वाम्-धेनौ | धेन्वोः | धेनुषु |

‘द’ कारान्तः पुंलिङ्गः ‘तद्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | सः | तौ | ते |
| **द्वि. वि** | तम् | तौ | तान् |
| **तृ.वि.** | तेन | ताभ्याम् | तैः |
| **च.वि.** | तस्मै | ताभ्याम् | तेभ्यः |
| **पं. वि** | तस्मात् | ताभ्याम् | तेभ्यः |
| **ष.वि.** | तस्य | तयोः | तेषाम् |
| **स.वि.** | तस्मिन् | तयोः | तेषु |

‘द’ कारान्तः स्त्रीलिङ्गः तद् शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | सा | ते | ताः |
| **द्वि. वि** | ताम् | ते | ताः |
| **तृ.वि.** | तया | ताभ्याम् | ताभिः |
| **च.वि.** | तस्यै | ताभ्याम् | ताभ्यः |
| **पं. वि** | तस्याः | ताभ्याम् | ताभ्यः |
| **ष.वि.** | तस्याः | तयोः | तासाम् |
| **स.वि.** | तस्याम् | तयोः | तासु |

@KTBS NOT TO BE REPUBLISHED

‘द’ कारान्तः नपुंसकलिङ्गः ‘तद्’ शब्दः

| | **ए.व.** | **द्वि.व.** | **ब.व** |
|---|---|---|---|
| **प्र.वि.** | तत् | ते | तानि |
| **द्वि. वि** | तत् | ते | तानि |
| **तृ.वि.** | तेन | ताभ्याम् | तैः |
| **च.वि.** | तस्मै | ताभ्याम् | तेभ्यः |
| **पं. वि** | तस्मात् | ताभ्याम् | तेभ्यः |
| **ष.वि.** | तस्य | तयोः | तेषाम् |
| **स.वि.** | तस्मिन् | तयोः | तेषु |

‘म’ कारान्तः पुंलिङ्गः ‘किम्’ शब्दः

| | **ए.व.** | **द्वि.व.** | **ब.व** |
|---|---|---|---|
| **प्र.वि.** | कः | कौ | के |
| **द्वि. वि** | कम् | कौ | कान् |
| **तृ.वि.** | केन | काभ्याम् | कैः |
| **च.वि.** | कस्मै | काभ्याम् | केभ्यः |
| **पं. वि** | कस्मात् | काभ्याम् | केभ्यः |
| **ष.वि.** | कस्य | कयोः | केषाम् |
| **स.वि.** | कस्मिन् | कयोः | केषु |

@KTBS NOT TO BE REPUBLISHED

‘म’ कारान्तः स्त्रीलिङ्गः ‘किम्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | का | के | काः |
| **द्वि. वि** | काम् | के | काः |
| **तृ.वि.** | कया | काभ्याम् | काभिः |
| **च.वि.** | कस्यै | काभ्याम् | काभ्यः |
| **पं. वि** | कस्याः | काभ्याम् | काभ्यः |
| **ष.वि.** | कस्याः | कयोः | कासाम् |
| **स.वि.** | कस्याम् | कयोः | कासु |

‘म’ कारान्तः नपुंसकलिङ्गः ‘किम्’ शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | किम् | के | कानि |
| **द्वि. वि** | किम् | के | कानि |
| **तृ.वि.** | केन | काभ्याम् | कैः |
| **च.वि.** | कस्मै | काभ्याम् | केभ्यः |
| **पं. वि** | कस्मात् | काभ्याम् | केभ्यः |
| **ष.वि.** | कस्य | कयोः | केषाम् |
| **स.वि.** | कस्मिन् | कयोः | केषु |

NOT TO BE REPUBLISHED
@KTBS

'द' कारान्तः त्रिलिङ्गः 'अस्मद्' शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | अहम् | आवाम् | वयम् |
| **द्वि. वि** | माम् / मा | आवाम् / नौ | अस्मान् / नः |
| **तृ.वि.** | मया | आवाभ्याम् | अस्माभिः |
| **च.वि.** | मह्यम् / मे | आवाभ्याम् /नौ | अस्मभ्यम् / नः |
| **पं. वि** | मत् | आवाभ्याम् | अस्मत् |
| **ष.वि.** | मम / मे | आवयोः / नौ | अस्माकं / नः |
| **स.वि.** | मयि | आवयोः | अस्मासु |

'द' कारान्तः त्रिलिङ्गः 'युष्मद्' शब्दः

| | ए.व. | द्वि.व. | ब.व |
|---|---|---|---|
| **प्र.वि.** | त्वम् | युवाम् | यूयम् |
| **द्वि. वि** | त्वाम् / त्वा | युवाम् / वाम् | युष्मान् / वः |
| **तृ.वि.** | त्वया | युवाभ्याम् | युष्माभिः |
| **च.वि.** | तुभ्यम् / ते | युवाभ्याम्/वाम् | युष्मभ्यम्/वः |
| **पं. वि** | त्वत् | युवाभ्याम् | युष्मत् |
| **ष.वि.** | तव/ते | युवयोः / वाम् | युष्माकम्/वः |
| **स.वि.** | त्वयि | युवयोः | युष्मासु |

© KTBS
NOT TO BE REPUBLISHED

# क्रियाकलापः

**I. रिक्तस्थानं पूरयत।**

| | | ए.व. | द्वि.वि. | ब.व. |
|---|---|---|---|---|
| ● | प्र.वि. | रामः | .......... | रामाः |
| | सं.प्र.वि. | हे अज | हे अजौ | .......... |
| | द्वि.वि. | .......... | गजौ | .......... |
| | तृ.वि. | माधवेन | .......... | .......... |
| | च.वि. | .......... | .......... | मुकुन्देभ्यः |
| | पं.वि. | खगात् | .......... | .......... |
| | ष.वि. | .......... | नगयोः | .......... |
| | स.वि. | वृक्षे | .......... | .......... |
| ● | प्र.वि. | माला | .......... | मालाः |
| | सं.प्र.वि. | हे कले | .......... | हे कलाः |
| | द्वि. वि | .......... | राधे | .......... |
| | तृ.वि. | शालया | .......... | शालाभिः |
| | च.वि. | .......... | सीताभ्याम् | .......... |
| | पं. वि | वनितायाः | .......... | .......... |
| | ष.वि. | .......... | .......... | महिलानाम् |
| | स.वि. | रमायां | .......... | .......... |

@KTBS NOT TO BE REPUBLISHED

| | | | |
|---|---|---|---|
| ● प्र.वि. | .......... | वने | .......... |
| सं.प्र.वि. | हे ज्ञान | .......... | हे ज्ञानानि |
| द्वि. वि | .......... | .......... | फलानि |
| तृ.वि. | पुस्तकेन | .......... | .......... |
| च.वि. | नयनाय | .......... | नयनेभ्यः |
| पं. वि | .......... | यन्त्राभ्याम् | .......... |
| ष.वि. | धनस्य | .......... | .......... |
| स.वि. | .......... | शरीरयोः | .......... |

**II. कोष्टके कानिचन पदानि सन्ति। तानि उपयुज्य उत्तराणि लिखत।**

**पत्रिकाम्, राधया, सीतायाः, शुभायै, अनुजायाम्, रमा**

१. अत्र <u>का</u> पठति ?

..................................

२. सा <u>कां</u> पठति ?

..................................

३. सा <u>कया</u> सह पठति ?

..................................

४. सा <u>कस्यै</u> फलानि यच्छति ?

..................................

५. सा <u>कस्याः</u> पुत्री अस्ति ?

..................................

६. सा <u>कस्यां</u> विश्वसिति ?

..................................

@KTBS NOT TO BE REPUBLISHED

**III. एतानि वाक्यानि विभक्तिक्रमेण लिखत।**




**IV. अकारान्तपुंलिङ्गशब्दानां स्थाने आकारान्तस्त्रीलिङ्गशब्दान् उपयुज्य लिखत।**

उदा - बालकौ धावतः। बालिके धावतः। (बालिका)

१) शिष्यः मूषकान् पश्यति। शिष्या ............. पश्यति। (मूषिका)

२) पुत्रः जनकेन सह गच्छति। पुत्रः ............. सह गच्छति (अम्बा)

३) माता सुताय क्षीरं यच्छति। माता ............. क्षीरं यच्छति (सुता)

४) फलानि वृक्षात् पतन्ति। फलानि ............. पतन्ति (लता)

**V. पुंलिङ्ग - नपुंसकलिङ्गशब्दान् पृथक् लिखत।**

पुत्र, मित्र, सुरेश, जनक, पुस्तक, ज्ञान, पुष्प, बालक, वृक्ष, सुख, जल, गोपाल, भोजन

@KTBS NOT TO BE REPUBLISHED

**VI. निर्देशानुारं परिवर्तयत।**

उदा - वनिता पुष्पम् आनयति (बहुवचने)

वनिता पुष्पाणि आनयति।

१. रामः पत्रं पठति (बहुवचने)

.......................................।

२. शीला उद्यानानि पश्यति (एकवचने)

.......................................।

३. माधवः शुनकेन सह गच्छति (बहुवचने)

.......................................।

४. फलानि मित्राय ददाति। (बहुवचने)

.......................................।

५. छात्राः उद्यानेभ्यः आगच्छन्ति (एकवचने)

.......................................।

६. अध्यापकः पुस्तकस्य चयनं करोति। (बहुवचने)

.......................................।

७. मृगाः वनेषु भवन्ति। (एकवचने)

.......................................।

*****

@KTBS NOT TO BE REPUBLISHED

## त्रयोदशः पाठः

# तिङन्ताः

U8R2K2

क्रियापदानां मूलभूतं शब्दरूपं 'धातुः' इति कथ्यते। अर्थात् क्रियायाः बोधकाः भू-रम्-पठ् इत्यादयः धातुः इति संज्ञया व्यवह्रियन्ते।

क्रियापदे → धातुः + विकरणप्रत्ययः + तिङ्प्रत्ययः च इति त्रयःभागाः सन्ति।

अत्र तिङन्तमेव क्रियापदम् इति व्यवह्रियते।

उदा → पठ् + अ + ति = पठति

संस्कृतभाषायां प्रायः द्विसहस्रं (२०००) धातवः सन्ति। व्यवस्थादृष्ट्या ते धातवः दशसु गणेषु विभक्ताः। एते २००० धातवः पुनः त्रिधा विभक्ताः।

१. परस्मैपदिनः, २. आत्मनेपदिनः ३. उभयपदिनः च इति ।

एतेषां क्रियापदानां त्रयः पुरुषाः भवन्ति। ते प्रथमपुरुषः - मध्यमपुरुषः - उत्तमपुरुषः च इति। एतेषां त्रीणि वचनानि अपि भवन्ति। तानि एकवचनं, द्विवचनं, बहुवचनं च इति।

धातुभिः या क्रिया प्रतिपाद्यते तस्याः त्रयः कालाः सम्भवन्ति।

| **कालः** | **उदाहरणम्** |
|---|---|
| वर्तमानकालः | पठति |
| भविष्यत्कालः | पठिष्यति |
| भूतकालः | अपठत् |

क्रियायाःकालस्य अर्थविशेषस्य च बोधनार्थं दश लकाराः भवन्ति।

© KTBS NOT TO BE REPUBLISHED

**लट् वर्तमाने लेट् वेदे भूते लुङ्लङ्लिटस्तथा।**
**विध्याशिषोश्च लिङ्लोटौ लुट् लृट् लृङ् च भविष्यति।।**

१. वर्तमानकाले धातोः लट्लकारः भविष्यति।

२. आज्ञा,प्रार्थना इत्यादिषु अर्थेषु धातोः लोट्लकारः भवति।

३. भूतकाले लङ्लकारः भवति।

## पठ्धातुः

## लट्लकारः - वर्तमानकालः - परस्मैपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रामः, माला, सः, सा, तत् → पठति | रामौ, माले, तौ, ते, ते → पठतः | रामाः, मालाः, ते, ताः, तानि → पठन्ति |
| मध्यमपुरुषः | त्वम् → पठसि | युवां → पठथः | यूयम् → पठथ |
| उत्तमपुरुषः | अहम् → पठामि | आवां → पठावः | वयम् → पठामः |

@KTBS
NOT TO BE REPUBLISHED

## भू धातुः

## लट्लकारः, वर्तमानकालः - परस्मैपदी

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | खेलति | खेलतः | खेलन्ति |
| मध्यमपुरुषः | खेलसि | खेलथः | खेलथ |
| उत्तमपुरुषः | खेलामि | खेलावः | खेलामः |

## हस् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | हसति | हसतः | हसन्ति |
| मध्यमपुरुषः | हससि | हसथः | हसथ |
| उत्तमपुरुषः | हसामि | हसावः | हसामः |

©KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

## लृट् लकारः भविष्यत्कालः - 'पठ्' धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | खेलिष्यति | खेलिष्यतः | खेलिष्यन्ति |
| मध्यमपुरुषः | खेलिष्यसि | खेलिष्यथः | खेलिष्यथ |
| उत्तमपुरुषः | खेलिष्यामि | खेलिष्यावः | खेलिष्यामः |

## हस् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | हसिष्यति | हसिष्यतः | हसिष्यन्ति |
| मध्यमपुरुषः | हसिष्यसि | हसिष्यथः | हसिष्यथ |
| उत्तमपुरुषः | हसिष्यामि | हसिष्यावः | हसिष्यामः |

©KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

## लङ् लकारः भूतकालः - पठ् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | अखेलत् | अखेलताम् | अखेलन् |
| मध्यमपुरुषः | अखेलः | अखेलतम् | अखेलत |
| उत्तमपुरुषः | अखेलम् | अखेलाव | अखेलाम |

## हस् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | अहसत् | अहसताम् | अहसन् |
| मध्यमपुरुषः | अहसः | अहसतम् | अहसत |
| उत्तमपुरुषः | अहसम् | अहसाव | अहसाम |

© KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

## लोट् लकारः - पठ् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | पठतु / पठतात् | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ / पठतात् | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |

## खेल् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | खेलतु / खेलतात् | खेलताम् | खेलन्तु |
| मध्यमपुरुषः | खेल / खेलतात् | खेलतम् | खेलत |
| उत्तमपुरुषः | खेलानि | खेलाव | खेलाम |

## हस् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | हसतु / हसतात् | हसताम् | हसन्तु |
| मध्यमपुरुषः | हस / हसतात् | हसतम् | हसत |
| उत्तमपुरुषः | हसानि | हसाव | हसाम |

© KTBS NOT TO BE REPUBLISHED

## गम्लृ (गम्) - धातु

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छतु / गच्छतात् | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ / गच्छतात् | गच्छतम् | गच्छत |
| उत्तमपुरुषः | गच्छानि | गच्छाव | गच्छाम |

## आत्मनेपदी - लट् लकारः - शोभ्धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शोभते | शोभेते | शोभन्ते |
| मध्यमपुरुषः | शोभसे | शोभेथे | शोभध्वे |
| उत्तमपुरुषः | शोभे | शोभावहे | शोभामहे |

## वर्ध् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्धते | वर्धेते | वर्धन्ते |
| मध्यमपुरुषः | वर्धसे | वर्धेथे | वर्धध्वे |
| उत्तमपुरुषः | वर्धे | वर्धावहे | वर्धामहे |

## लभ् - धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लभते | लभेते | लभन्ते |
| मध्यमपुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुषः | लभे | लभावहे | लभामहे |

@KTBS NOT TO BE REPUBLISHED

## एध् धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | एधते | एधेते | एधन्ते |
| मध्यमपुरुषः | एधसे | एधेथे | एधध्वे |
| उत्तमपुरुषः | एधे | एधावहे | एधामहे |

## विशेषक्रियारूपाणि

## अस् - धातुः - लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

# कृञ् (कृ) धातुः - लट् लकारः

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

## अभ्यासः

**१. उचितम् उत्तरं चित्वा लिखत ।**

१) क्रियापदानां मूलरूपम् एवं कथ्यते।

अ) सुबन्तः आ) तिङन्तः इ) धातुः ई) उपसर्गः

२) वर्तमानकाले धातोः अयं लकारः भवति।

अ) लङ् आ) लट् इ) लृट् ई) लोट्

३) 'हसिष्यति' अस्य बहुवचनरूपम् इदं भवति।

अ) हसिष्यामि आ) हसिष्यथः इ) हसिष्यन्ति ई) हसिष्यामः

४) संस्कृतभाषायां प्रायः एतावन्तः धातवः सन्ति।

अ) २००० आ) ३००० इ) १००० ई) ५०००

५) क्रियापदस्य नामान्तरम् इदं भवति।

अ) सुबन्तम् आ) धातुः इ) प्रत्ययः ई) तिङन्तम्

**२. इतरवचनद्वयं लिखत ।**

१. .......... पठथः ..........।

२. हसामि .......... ..........।

@KTBS NOT TO BE REPUBLISHED

| | | | |
|---|---|---|---|
| ३. | .......... | .......... | गच्छन्ति। |
| ४. | .......... | अनमताम् | ..........। |
| ५. | .......... | .......... | हसथ। |
| ६. | पठिष्यति | .......... | ..........। |
| ७. | .......... | शोभेते | ..........। |
| ८. | गच्छानि | .......... | ..........। |

## क्रियाकलापः

**I. उदाहरणानुसारं भूतकालवाक्यानि लिखत ।**

| | वर्तमानकाले | भूतकाले |
|---|---|---|
| उदा | १. सः पठति। | सः अपठत्। |
| | २. रामः वनं गच्छति। | ...............। |
| | ३. रमा लेखन्या लिखति। | ...............। |
| | ४. बालकः उत्तरं यच्छति। | ...............। |
| | ५. वृक्षात् फलं पतति। | ...............। |

**II. उचितक्रियापदेन रिक्तस्थानं पूरयत ।**

१. बालकाः पुस्तकम् ...........। (अपठम्-अपठत्-अपठन्)

२. सिंहः वने ...........। (गजसि-गर्जति-गजामि)

३. गगने मेघाः ...........। (चलन्ति-चलावः-चलतु)

४. अहं पूजाम् ...........। (अकरोत्-कुरु-अकरवम्)

५. त्वं गृहं ...........। (गच्छ-गच्छतु-गच्छानि)

NOT TO BE REPUBLISHED @KTBS

**III. पुरुषानुगुणम् अधोनिर्दिष्टानि रूपाणि विभजत ।**

अगायताम् - शोभते - पठन्तु - लिखति

धावसि - करोति - अपठः - चोरयन्ति

नृत्यामि - अक्रीडाम - वन्देथे - गच्छतम्

वदावः - ताडयन्ति - खादन्ति - नयताम्

| प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|
| | | |

@KTBS NOT TO BE REPUBLISHED

**IV. संयोजयत ।**

| अ | आ | उत्तराणि |
|---|---|---|
| अहम् | गायति | ............ |
| त्वम् | गच्छामः | ............ |
| गौरी | पठ | ............ |
| माधवः | लिखथ | ............ |
| वयम् | अपिबम् | ............ |
| यूयम् | खादति | ............ |

*****

## पूरकपाठौ

# १. एकलव्यस्य गुरुभक्तिः

आसीत् द्रोणो नाम प्रथितो धनुर्वेदाचार्थः । कदाचित्तस्य धनुर्वेदकौशलं समीक्ष्य कुरुकुलपितामहः भीष्मः तं स्वनगरमानयत् । स्वपौत्रान् कौरवपाण्डवान् तस्य शिष्यान् चकार च । स च द्रोणः तान् विद्यायां परिणतान् अकरोत्। गुरुः अर्जुनस्य धनुर्वेदे परमं प्रावीण्यं वीक्ष्य अतितरां प्रीतः । अवदत् च - अर्जुन, त्वां लोकोत्तरं धनुर्धरं करिष्यामि इति ।

द्रोणस्य कौशलं श्रुत्वा बहवो राजपुत्राः अस्त्राभ्यासाय तत्रागताः । हिरण्यधनुषो निषादराजस्य पुत्रः एकलव्योऽपि द्रोणसमीपमागतः । द्रोणः निषादकुमारमेकलव्यं शिक्षयितुमनिच्छन् अवदत् । एकलव्य, त्वं मम शिष्योऽसि । स्वगृहे एव अस्त्रविद्यां शिक्षस्व। शरप्रयोगे बलवत्तरो भविष्यसि इति । एकलव्यस्तु द्रोणस्य पादौ शिरसि कृत्वा स्वभवनमागतः । तत्र द्रोणस्य मृण्मयीं प्रतिमां विधाय, तां मूर्तिं सदा पूजयन् स्वयमेव अस्त्रविद्यामशिक्षत। अचिरादेव अस्त्रविद्यायां प्रावीण्यमलभत।

एकदा द्रोणस्याज्ञया। कौरवपाण्डवा मृगयां कर्तुं वनमगच्छन् । तेषु मृगयां कुर्वत्सु सारमेयः अपरिचितमेकलव्यं दृष्ट्वा अभषत् । अनुपदमेव स भषतश्शुनो मुखे सप्तशरानपूरयत्। स श्वा शरपूर्णास्यः अर्जुनसमीपमागच्छत्। स तु तं विलोक्य विस्मितः तं शरमोचनप्रवीणमन्विष्यन् भ्रातृभिः सह आगत्य, अविरतं शरान् प्रयुञ्जानं एकलव्यमपश्यत् । 'को भवान्?' इत्यपृच्छच्च । स तु निषादाधिपतेः सुतः धनुर्वेदे कृतपरिश्रमः द्रोणशिष्योऽहम् इत्यवदत् ।

तदाकर्ण्य विस्मिताः सर्वे प्रतिनिवृत्य सर्वमुदन्तं गुरवे द्रोणाय निवेदयामासुः। अर्जुनस्तु रहसि द्रोणसन्निधिमागत्य- ''गुरो, तत्रभवता तु- त्वां लोकोत्तरं धनुर्धरं

NOT TO BE REPUBLISHED ©KTBS

करिष्यामि इत्यभिहितम्। इदानीं तु अरण्ये भवदन्तेवासी मत्तोऽपि अस्त्र-विद्या-कुशलतरः एकलव्यो निवसति। कथमेतत्?'' इत्यपृच्छत्।

द्रोणस्तु मुहूर्तं विचार्य अर्जुनेन सह वनमगच्छत्। तत्र स्वाकृतिविराजितप्रतिमायाः पुरतः अस्त्रविद्याभ्यासनिरतं एकलव्यमपश्यत्। स तु आयान्तं द्रोणमवलोक्य तमुपसंगम्य शिरसा प्रणम्य अर्घ्यपाद्यादिभिः आराधयामास। द्रोणस्तु प्रीतमनाः -'यदि मे शिष्योऽसि तर्हि गुरुदक्षिणां देहि' इत्यब्रवीत्। तदा 'किं ददानि' इति भक्तिनम्रः एकलव्यः प्राञ्जलिर्निवेदयामास । 'तव दक्षिणहस्ताङ्गुष्ठं गुरुदक्षिणार्थं देहि' इति द्रोणः सुदारुणमगदत् ।

द्रोणस्य तादृशं वचनं श्रुत्वा प्रतिज्ञा रक्षन् एकलव्यो मुदा दक्षिणकराङ्गुष्ठं छित्वा द्रोणाय प्रादात् । एकलव्यस्य तादृशीं वीरभक्तिं विलोक्य सर्वे विस्मिता अभवन्। देवाश्च तस्योपरि-कुसुमवृष्टिमवर्षन् । ततः स पूर्ववत् शरान् मोक्तुमसमर्थोऽभवत्।

एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्।<br>
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत् ।।

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**I. पञ्चषैः वाक्यैः कर्णाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१. एकलव्यस्य गुरुभक्तिं विवृणुत ।

*****

# २. परमकारुणिकः महर्षिः




१. पुरा कश्चन महर्षिः शकटमार्गे धावन्तं कञ्चित् कीटम् अपश्यत्। सः मुनिः सर्वज्ञः। अतः सः सर्वप्राणिनाम् इहपरगतिं भाषां च जानाति स्म। सः कीटम् अपृच्छत् -'' रे! कीट ! कुत्र धावसि ? कुतः ते भयम् आगतम्?'' इति। कीटः अकथयत् - ''भोः तपोधन ! तत्र पश्यतु। शकटः वेगेन आगच्छति। एतस्य शब्दं श्रुत्वा मम तु महत् भयम्। अतः जीवरक्षार्थं प्रवृत्तः अहं शीघ्रं धावामि'' इति।

२. तदा मुनिः अवदत् -''जीवनरक्षणम् एव अन्तिमं लक्ष्यं किम्? जन्मान्तरं लब्ध्वा इतोऽपि साधनां कर्तुं शक्यते किल?''

३. एतत् श्रुत्वा कीटः अगदत्। हे महामुने! पूर्वस्मिन् जन्मनि धनाढ्योऽहं कृपणः दुर्बुद्धिः च आसम्। तस्य फलम् एव इदं जन्म। परन्तु वृद्धायाः मातुः सेवाम् अकरवम्। अस्याः सेवायाः महिम्ना अहं पूर्ववृत्तं स्मरामि। हे महाप्राज्ञ! मां रक्ष। भवतः करुणा मयि भवतु ''इति दुःखेन प्रार्थयत्। तदा सः मुनिः-''अहं त्वां कीटजन्मनः तारयिष्यामि'' इति उक्त्वा तपोबलात् तं कीटम् अतारयत्।

@KTBS NOT TO BE REPUBLISHED

४. कस्यचित् कीटस्य विषयेऽपि येन एवं महान् आदरः प्रदर्शितः सः महर्षिः परमदयालुः सत्यवती-पराशरयोः सुतः कृष्णद्वैपायनः। बदरिकाश्रमे चिरकालम् अतिष्ठत् इति कारणतः बादरायणः इति तस्य नाम जातम्। सः अध्ययनसौकर्यार्थं वेदविभागम् अकरोत्। अतः तस्य वेदव्यासः इत्यपि नाम अभवत्।

५. पञ्चमो वेदः इति ख्यातम् अस्ति महाभारतम्। ''यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्'' इति एषा उक्तिः महाभारतस्य वैशिष्ट्यं सूचयति। भगवता श्री कृष्णेन उपदिष्टा भगवद्गीता महाभारते भीष्मपर्वणि अस्ति। म हाभारतम्, अष्टादश पुराणानि, ब्रह्मसूत्राणि च व्यासमहर्षिः अरचयत्। तस्य स्मरणार्थम् आराधनार्थं च आषाढपूर्णिमां गुरुपूर्णिमा इति, व्यासपूर्णिमा इति वा लोके आचरन्ति।

६. वेदोक्तधर्मस्य अनुष्ठानं वेदव्यासस्य स्मरणेन भवति इति मन्यमानाः भारतीयाः व्यासपूर्णिमादिनं प्रतिवर्षम् आचरन्ति। वयमपि ज्ञानाकांक्षिणः। श्रद्धया आषाढपूर्णिमावसरे भगवन्तं वेदव्यासम् अर्चयामः।

**व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।**
**पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ।।**

NOT TO BE REPUBLISHED @KTBS

## अभ्यासः

**I. पञ्चषैः वाक्यैः कर्णाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

१. महर्षिकीटयोः संवादं लिखत।

२. व्यासमहर्षेः वैशिष्ट्यं लिखत।

*****

परिशिष्टम्

# १. वाक्यरचना कौशलम्

सूर्योदयः



NOT TO BE REPUBLISHED

* उदाहरण वाक्यं पठित्वा, मञ्जूषातः पदं चित्वा रिक्तस्थानम् पूरयत-

उदा : सूर्योदयः रमणीयः अस्ति।

१) सूर्यः __________ दिशि उदेति।

२) प्रभाते किरणाः __________ भवन्ति।

३) सूर्यकिरणाः __________ विकासयन्ति ।

४) सूर्यनमस्कारः __________वर्धयति ।

| आरोग्यम्, पुष्पाणि, रक्तवर्णे, पूर्वस्यां |
|---|

## दीपावली



✻ मञ्जूषातः पदं चित्वा वाक्यानि रचयत-

| धार्मिकोत्सवः, बालकः, गृहम्, वृक्षः, दीपाः, लक्ष्मीपूजा |
|---|

## गौतम बुद्धः



✻ चित्रं दृष्ट्वा वाक्यानि रचयत।

## ग्रामः



✻ चित्रं दृष्ट्वा वाक्यानि रचयत।

@KTBS
BE REPUBLISHED

## नदी



✻ चित्रं दृष्ट्वा वाक्यानि रचयत।

## २. पदकोशः

| | | |
|---|---|---|
| धीमन्तः | ಬುದ್ಧಿಶಾಲಿಗಳು | Intelligent Wise |
| पतिः | ಗಂಡ | Husband |
| कृपया | ದಯವಿಟ್ಟು | Please |
| पाणिग्रहणम् | ವಿವಾಹ (ಮದುವೆ) | Marriage, Wedding |
| निःस्पृहः | ನಿಃಸ್ವಾರ್ಥಿ | Selfless |
| शकटमार्गः | ಗಾಡಿ ಸಂಚರಿಸುವ ದಾರಿ | Cart Street |
| धनाढ्यः | ಶ್ರೀಮಂತ | Rich, Wealthy |
| कृपणः | ಜಿಪುಣ | Miser |
| आदरः | ಗೌರವ | Respect, Honour |
| प्रथितः | ಪ್ರಸಿದ್ಧ | Famous, Well-known |
| कुलीनः | ಸಜ್ಜನ, ಸತ್ಕುಲದಲ್ಲಿ ಹುಟ್ಟಿದವ | Noble, Born in noble family |
| ज्ञातिः | ಬಂಧು, ಸಂಬಂಧಿ | Relative |
| सोमः | ಚಂದ್ರ | Moon |
| प्रभाकरः | ಸೂರ್ಯ | Sun |
| उदर वेदना | ಹೊಟ್ಟೆನೋವು | Stomachache |
| ह्यः | ನಿನ್ನೆ | Yesterday |
| खाद्यम् | ತಿಂಡಿ | Eatable |
| पङ्कः | ಕೆಸರು | Dirt Mud |
| वरम् | ಉತ್ತಮ, ಯೋಗ್ಯ | Good |
| भेषजः | ಔಷಧಿ | Medicine |
| पथ्यम् | ಹಿತಾಹಾರ | Diet |

©KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| तक्रम् | ಮಜ್ಜಿಗೆ | Buttermilk |
| मेधा | ಬುದ್ಧಿ | Wisdom |
| कृष्ण: | ಕಪ್ಪು | Black |
| उत्सव: | ಹಬ್ಬ | Festival |
| पिक: | ಕೋಗಿಲೆ | Cuckoo |
| व्यसनम् | ದುಶ್ಚಟ | Vice |
| श्रोत्रिय: | ವೈದಿಕ, ವೇದಪಂಡಿತ | Learned in Vedas, Vedic Pandit |
| दुर्भिक्ष: | ಬರಗಾಲ | Famine |
| अर्थ | ಹಣ, ಸಂಪತ್ತು | Wealth |
| क्षपणक: | ಜೈನ/ಬೌದ್ಧ ಸಂನ್ಯಾಸಿ | Jain Monk |
| वणिक् | ವ್ಯಾಪಾರಿ | Merchant |
| उपायनम् | ಕಾಣಿಕೆ | Gift |
| नापित: | ಕ್ಷೌರಿಕ | Barber |
| कनकम् | ಬಂಗಾರ | Gold |
| निर्धन: | ಬಡವ | Poor |
| खिन्ना: | ದುಃಖಿತ | Sad, Worried |
| निधि: | ಸಂಪತ್ತು | Wealth |
| पुरजना: | ಊರಿನವರು | Citizen |
| उन्मीलयति | ತೆರೆಯುತ್ತಾನೆ | Opens |
| पन्नग: | ಸರ್ಪ | Serpent, Snake |
| जिह्वा | ನಾಲಿಗೆ | Tongue |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| आत्मजा | ಮಗಳು | Daughter |
| रुद्रः | ಶಿವ | Shiva |
| अनिलः | ಗಾಳಿ | Wind, Air |
| अर्कः | ಸೂರ್ಯ | Sun |
| परिष्कुर्वन्ति | ಸ್ವಚ್ಛ ಮಾಡುತ್ತಾರೆ | Clean (V) |
| आपणः | ಅಂಗಡಿ | Shop |
| नूतनम् | ಹೊಸ | New |
| स्फोटकम् | ಪಟಾಕಿ | Cracker |
| आवली | ಸಾಲು | Series |
| जलतृष्णा | ದಾಹ, ಬಾಯಾರಿಕೆ | Thirst |
| झटिति | ಬೇಗನೆ | Suddenly |
| बहिः | ಹೊರಗೆ | Out side |
| विकलाङ्गः | ಅಂಗಹೀನ | Handicapped |
| उषित्वा | ವಾಸಿಸಿ | Having Resided |
| योगदानम् | ಕೊಡುಗೆ | Contribution |
| भौतशास्त्रम् | ಭೌತಶಾಸ್ತ್ರ | Physics |
| पिपासा | ಬಾಯಾರಿಕೆ | Thirst |
| रसतन्त्रम् | ರಸಾಯನಶಾಸ್ತ್ರ | Chemistry |
| शुष्कपर्णम् | ಒಣಗಿದ ಎಲೆ | Dry leaf |
| योजनम् | ಸುಮಾರು 12 ಕಿ.ಮೀ. ದೂರ | About 12 k.ms. distance |
| कलत्रम् | ಹೆಂಡತಿ | Wife |
| चारु | ಸುಂದರ, ಉತ್ಕೃಷ್ಟ | Beautiful |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| अङ्घ्रिः | ಪಾದ, ಕಾಲು | foot |
| पौत्रः | ಮೊಮ್ಮಗ | Grand Son (Son's son) |
| अरविन्दः | ಕಮಲ | Lotus |
| चित्तम् | ಮನಸ್ಸು | Mind |
| भोगः | ಸುಖ | Enjoyment |
| वाजी | ಕುದುರೆ | Horse |
| वित्तम् | ಹಣ | Money |
| वाञ्छितम् | ಮನಸ್ಸಿನ ಬಯಕೆ | Wants, Disires |
| तटः | ದಡ | Bank, Shore |
| तरुः | ಮರ | Tree |
| खगः | ಪಕ್ಷಿ | Bird |
| सहपाठी | ಜೊತೆಯಲ್ಲಿ ಓದುವವ | Classmate |
| ग्रीष्मऋतुः | ಬೇಸಿಗೆ ಕಾಲ | Summer Season |
| निरामयः | ಆರೋಗ್ಯವಂತ | Healthy Man |
| कृषकः | ರೈತ | Farmer |
| पितृव्यः | ಚಿಕ್ಕಪ್ಪ | Uncle |
| सुकृतिः | ಉತ್ತಮಕಾರ್ಯ | Noble deed |
| जरा | ಮುಪ್ಪು | Old age |
| पर्वदिनम् | ಹಬ್ಬ | Festive day |
| विघ्नम् | ತೊಂದರೆ | Obstacle |
| क्षिप्त्वा | ಎಸೆದು | Having thrown |
| वत्सः | ಪುತ್ರ | Son |

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| अपुत्रः | ಮಕ್ಕಳಿಲ್ಲದವನು | Childless |
| ज्येष्ठः | ಹಿರಿಯ | Eldest |
| घोषः | ಶಬ್ದ | Noise, Sound |
| नृपः | ಅರಸ, ರಾಜ | King |
| प्रतिवेशी | ನೆರೆಯ | a neighbour |
| भीरुः | ಹೇಡಿ, ಅಂಜುಬುರುಕ | Coward |
| नितराम् | ಪೂರ್ಣವಾಗಿ (ಬಹಳ) | Completely |
| मुहूर्तम् | ಕ್ಷಣ, ಅಲ್ಪಕಾಲ | Short while |
| धूमः | ಹೊಗೆ | Smoke |
| चिरम् | ಬಹಳಕಾಲ | For long |
| शत्रुः | ವೈರಿ | Enemy |
| विचक्षणः | ಜ್ಞಾನಿ, ಬುದ್ಧಿವಂತ | learned; scholar |
| ग्लानिः | ನಾಶವಾಗುವುದು | decay, decline |
| सङ्गः | ಪ್ರೀತಿ / ಆಸಕ್ತಿ | attachment |
| ध्रुवम् | ನಿಶ್ಚಯ | Certain |
| सम्मोहः | ಸಮ್ಮೋಹ | delusion |
| विभ्रमः | ದಿಗಿಲು | Fix, Confusion |
| उदासीनः | ನಿಷ್ಪಕ್ಷಪಾತಿ | unconcerned |
| गतव्यथः | ದುಃಖ ಇಲ್ಲದಿರುವವನು | free of agony |
| स्मृतिः | ನೆನಪು | Memory |
| अनपेक्षः | ಆಸೆ ಇಲ್ಲದವನು | Free of wants |
| अजस्रम् | ನಿರಂತರ, ಎಡಬಿಡದೆ | Continuously, Constant |

©KTBS
NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| पूता | ಶುದ್ಧ, ಪವಿತ್ರ | Holified, Sanshified |
| हासः | ನಗು | Laughter |
| तन्द्रा | ಸೋಮಾರಿತನ, ಆಲಸ್ಯ | Lethargy |
| मृगया | ಬೇಟೆ | Hunting |
| तालीपत्रम् | ತಾಳೆಗರಿ | Palm leaf |
| जम्बूपादपः | ನೇರಳೇ ಮರ | Roseapple tree |
| शाखा | ಟೊಂಗೆ, (ಕೊಂಬೆ) | Branch |
| लङ्घनम् | ಹಾರು | Jump |
| पक्वम् | ಬಲಿತ, ಮಾಗಿದ | Riped |
| विमलम् | ಶುದ್ಧ | Pure |

@KTBS
NOT TO BE REPUBLISHED

# ३. प्रश्नपत्रिका स्वरूपम् - अङ्काः-४०

## सङ्कलनात्मकमौल्यमापनम्-०१

| | | |
|---|---|---|
| ✻ | समुचितम् उत्तरं क्रमाक्षरेण सह चित्वा लिखत । | 5×1=5 |
| ✻ | एकवाक्येन उत्तरं लिखत । | 5×1=5 |
| ✻ | श्लोकतात्पर्यं संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत । | 1×2=2 |
| ✻ | कवेः देश-काल-ग्रन्थानां विषये लिखत । | 1×2=2 |
| ✻ | आम्/ न इति लिखत । | 1×2=2 |
| ✻ | चतुर्थं पदं लिखत । | 1×2=2 |
| ✻ | रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत । | 1×2=2 |
| ✻ | पद्यं पूरयत । | 1×2=2 |
| ✻ | निर्देशानुसारम् उत्तरं लिखत । | 1×3=3 |
| ✻ | पञ्चषैः वाक्यैः संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत । | 1×3=3 |
| ✻ | संस्कृतभाषया अनुवादं कुरुत । | 1×3=3 |
| ✻ | आङ्ग्लभाषया, कर्णाटकभाषया वा अनुवादं कुरुत । | 1×3=3 |
| ✻ | पत्रं लिखत । | 1×3=3 |
| ✻ | प्रबन्धं लिखत । | 1×3=3 |

✻✻✻✻✻

@KTBS NOT TO BE REPUBLISHED

# प्रश्नपत्रिका स्वरूपम् - अङ्काः-४०

## सङ्कलनात्मकमौल्यमापनम्-०२

| | | |
|---|---|---|
| ✻ | समुचितम् उत्तरं क्रमाक्षरेण सह चित्वा लिखत । | $5\times1=5$ |
| ✻ | एकवाक्येन उत्तरं लिखत । | $5\times1=5$ |
| ✻ | सन्धिं विभज्य नाम लिखत । | $1\times2=2$ |
| ✻ | कविपरिचयं कुरुत । | $1\times2=2$ |
| ✻ | श्लोकतात्पर्यं संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत । | $1\times2=2$ |
| ✻ | आम् / न इति लिखत । | $1\times2=2$ |
| ✻ | संस्कृतभाषया अनुवादं कुरुत । | $1\times2=2$ |
| ✻ | आङ्ग्लभाषया, कर्णाटकभाषया वा अनुवादं कुरुत । | $1\times2=2$ |
| ✻ | पद्यं पूरयत । | $1\times4=4$ |
| ✻ | निर्देशानुसारम् उत्तरं लिखत । | $1\times3=3$ |
| ✻ | लिङ्ग विभक्ति वचनानि लिखत । | $1\times2=2$ |
| ✻ | पञ्चषैः वाक्यैः संस्कृतभाषया, आङ्ग्लभाषया, कर्णाटकभाषया वा उत्तरं लिखत । | $1\times3=3$ |
| ✻ | पत्रं लिखत । | $1\times3=3$ |
| ✻ | प्रबन्धं लिखत । | $1\times3=3$ |

✻✻✻✻✻

NOT TO BE REPUBLISHED @KTBS

## आकरग्रन्थाः


१. सहवासः - सुगन्धः - संस्कृतभारती 'अक्षरं' बेङ्गलूरु

२. दिनचर्या - प्रथमदीक्षा - राष्ट्रियसंस्कृत-संस्थानम्

३. चतुरः कालिदासः - भोजप्रबन्धः

४. पण्डितभास्करः - वाणीवाहनः - डा. आर् गणेशः

५. तपोवनाभिगमनम् - कविकोपकलापः - डा. विश्वासः



© KTBS NOT TO BE REPUBLISHED


**प्रथमः संस्कृतज्ञानपीठप्रशस्तिपुरस्कृतः डा. सत्यव्रतशास्त्री**
**- समग्रसाहित्यम् - 2009**



डा. सत्यव्रतशास्त्री

# पाठयोजना

| मासाः | पाठाः |
|---|---|
| जून् | वर्णाः, दिनचर्या संख्याः च, सहवासः |
| जुलै | नीतिबोधः (कण्ठपाठः करणीयः), सुबन्ताः-१-६, आरोग्यभाग्यम्, भिक्षुकस्यस्वप्नः |
| आगस्ट् | जीवनसाफल्यम्, पत्रलेखनम्-१, तिङन्ताः- परस्मैपदी, प्रबन्धः१,२, |
| सेप्टेम्बर् | सुबन्ताः(७-१५), अनुवादः(१-४) अक्कमहादेवी, चतुरः कालिदासः |
| अक्टोबर् | गुर्वष्टकम्, (कण्ठपाठः करणीयः) |
| नवेम्बर् | सन्धिः, (१,२) प्रहेलिकाः, दुराशाफलम् |
| डिसेम्बर् | सन्धिः(३,४,५) सिद्धभूमिः सिद्धगङ्गा, पत्रलेखनम्-२, अनुवादः(५-८) |
| जनवरि | पण्डितभास्करः, समासः, एकलव्यस्य गुरुभक्तिः, प्रबन्धः - (३, ४), तिङन्ताः- आत्मनेपदी, विशेषरूपाणि |
| फेब्रवरि | तपोवनाभिगमनम्, परमकारुणिकः महर्षिः, वाक्यरचना कौशलम् |
| मार्च् | प्रश्नोत्तरलेखनाभ्यासः, पुनरावर्तनम् |

@KTBS NOT TO BE REPUBLISHED

# NOTE

@KTBS
NOT TO BE REPUBLISHED